Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णमोत्थुणं भगवओ महावीरस्स ।

श्री भूपेन्द्रसूरि-जैन साहित्य पुष्पाङ्कः ७ ।

जगत्पूज्य-गुरुदेव जैनाचार्य श्रीमद्विजयराजेन्द्रसूरीश्वर-श्रीमद्विजयधनचंद्रसूरीश्वरेभ्यो नमः ।

... सिंह मुनिकृत मूलग्रन्थश्लोकानुसारेण श्री सौधर्मबृहत्तपोगच्छीय स्व० पू० पा० साहि-
...शारद विद्याभूषण जैन श्वेताम्बराचार्य श्रीमद्विजयभूपेन्द्रसूरीश्वरविरचितसंस्कृतव्याख्यायुतम्-

# दृष्टान्तशतकम् ।

संशोधकाः—मुनिश्री गुलाबविजयोपाध्यायादिमुनयः

प्रकाशयित्री:—श्रीभूपेन्द्रसूरिजैनसाहित्यसमितिः मु. आहोर (मारवाड)

श्री वीरनिर्वाण सं. २४६७ | प्रथमवृत्तौ ५०१ | विक्रम सं० १९९८
श्री राजेन्द्रसूरि सं. ३६ | मूल्यः भेट | ई. सन् १९४१

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## श्री भूपेन्द्रसूरिजैनसाहित्यसमिति तरफसे प्रकाशित ग्रन्थ

१ सूक्तमुक्तावली संस्कृतगद्यमयी
२ जिनेन्द्रगुणमंजरी
३ श्री भूपेन्द्रसूरि जयन्ती
४ जगवल्लभस्तवनमाला
५ सिन्दूरप्रकर सान्वय हिन्दी अर्थ सह
६ शांतसुधारसभावना हिन्दी भावार्थ सह
७ दृष्टान्तशतक संस्कृतव्याख्यायुक्त

उक्त पुस्तकें भेट तरीके पोस्ट खर्च के भेजने पर निम्न पते से मिलेगी।

श्री भूपेन्द्रसूरिजैनसाहित्यसमिति
मु० आहोर (मारवाड)
(वाया एरनपुरा रोड)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# दो शब्द

प्रिय पाठकगण ! स्वर्गीय पू० पा० साहित्यविशारद विद्याभूषण आचार्यदेव श्रीमद्विजयभूपेन्द्रसूरीश्वरजी महाराज सा० विरचित टीकायुक्त दृष्टान्तशतक ७ वें पुष्प तरीके प्रकाशित हो रहा है। आपके रचित ग्रंथ प्रकाशनार्थ आहोर ( मारवाड़ ) में सं. १९९५ चैत्र वदि २ को वर्तमानाचार्य पू० पा० व्या० वा० आचार्यदेव श्रीमद्विजययतीन्द्रसूरीश्वरजी महाराज आदि मुनि-मंडलने एकत्रित हो 'श्रीभूपेन्द्रसूरिजैनसाहित्यसमिति' नामक संस्था कायम की, इस संस्थाद्वारा प्रकाशित होनेवाले ग्रंथों के संशोधन तथा प्रकाशनकार्य संपादन करने के लिये पू० पा० उपाध्यायजी श्रीमान् गुलाबविजयजी, मुनिराज तपस्वी हर्षविजयजी, मुनिराज श्रीहंसविजयजी, और मुनि श्रीकल्याणविजयजी इन चार मुनिवरों की नियति की गई। समिति के कायम होजानेपर समितिने सद्गत पू० पा० आचार्यश्री के रचित-ग्रंथ संशोधन तथा प्रकाशन का कार्य प्रारम्भ करदिया है। अतः शनैः २ पाठकवर्ग के हाथों में आपश्रीके द्वारा रचित ग्रंथ क्रमशः प्रकाशित होकर पहुँचते रहेंगें और पाठकवर्ग भी त्रुटियों को सुधारकर सद्गत आचार्यदेव तथा समिति के मुनिवरों का परिश्रम अपनाकर सफल करेंगें।

निवेदिका—**श्रीभूपेन्द्रसूरिजैनसाहित्यसंचालकसमिति**

मु० पो० **आहोर** ( मारवाड़ )

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीभूपेन्द्रसूरि–जैनसाहित्य–पुष्पाङ्कः ७

साहित्यविशारद–विद्याभूषण–श्रीमद्विजयभूपेन्द्रसूरीश्वर–विरचितं संस्कृतव्याख्यायुतम्

# दृष्टान्तशतकम् ।

तत्रादौ ग्रंथकर्तृमंगलाचरणं–शार्दूलविक्रीडित–छन्दसि—

नत्वा श्रीऋषभं सदा वृषधरं सौख्याकरं सुन्दरं, देवेन्द्रादिनुतं मुनीन्द्रमहितं पौरस्त्यतीर्थंकरम् ।
श्रोतॄणां प्रतिबोधकं सुखकरं दृष्टान्तकानामहं, कुर्वे काव्यशतं निजापरनृणां व्याख्यानसद्धेतवे॥ १॥

अर्थः—मंगलं प्रारिप्सितकामो ग्रन्थकर्ता पूर्वं श्रीतीर्थङ्करनमस्कारात्मकं मङ्गलं करोति नत्वेत्यादिना सदा निरन्तरं वृषो धर्मस्तस्य धारकं, सुखराशिं, सुन्दरं मनोहरं रूपवन्तं, देवेन्द्रादयो यं नमस्कुर्वन्ति, तं पुण्डरीकादिभिर्मुनिभिरर्चितमीदृशं प्रथमं तीर्थङ्करं श्रीऋषभदेवं भगवन्तं नमस्कृत्य श्रोतॄणां भव्यप्राणिनां, प्रतिबोधकं ज्ञानप्रदं, सुखकरं, कल्याणकरं, एवमात्मने परजनेभ्यश्च, व्याख्यानसौकर्याय दृष्टान्तानां शतकाव्यात्मकानामर्थात् दृष्टान्तशतकनाम्नो ग्रन्थस्य रचनामारचयामि करोमीतिभावः ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्याकर्तुर्मङ्गलाचरणम्–वसन्ततिलका–वृत्ते—

श्रीवर्द्धमानमवनम्य जिनं ह्यदोषं, राजेन्द्रसूरिसुगुरुञ्च गुरोर्गुणाढ्यम् ।
दृष्टान्तकाव्यशतकोपरि संस्कृतेऽहं, व्याख्यां करोमि भविनामुपदेशदातुम् ॥ १ ॥

अत्र मंगलेच्छुको व्याख्याकर्त्ता समस्तदोषनिर्मुक्तं रागद्वेषौ जयतीति जिनं जिनेश्वरं श्रिया--ज्ञानादिलक्ष्म्या युतं एतादृशं श्रीवर्द्धमानं–महावीरस्वामिनं पुनस्तथैव गुरोर्गुणैर्युक्तं सूरेः षट्त्रिंशद्गुणैः सहितं स्वकीयं श्रीविजयराजेन्द्रसूरिं गुरुवरमवनम्य नमस्कृत्य भव्यप्राणिनामुपदेशार्थमहं विजयभूपेन्द्रसूरिर्दृष्टान्तशतकाख्यग्रन्थभाषानुसारेण सरलसंस्कृते व्याख्यां करोमि रचयामीतिभावः।

अथाऽनित्यपञ्चेन्द्रियविषयसुखोपरि मधुबिन्दोः १–दृष्टान्तः—

तत्र तावत् संसारसुखस्य मधुबिन्दूपमां दत्त्वा मधुबिन्दुदृष्टान्तमवतारयति, शार्दूलविक्रीडित–छन्दसि यथा—

कश्चित्काननकुञ्जरस्य भयतो नष्टः कुबेरालय–शाखासु ग्रहणं चकार फणिनं कूपे त्वधो दृष्टवान् ।
वृक्षो वारणकम्पितोऽथ मधुनो बिन्दूनितो लेढि स, लुब्धश्चाऽमरशब्दतोऽपि न ययौ संसारसक्तो यथा ॥२॥

कश्चिन्नरो वने गच्छन् कश्चिद्धस्तिनं दृष्टवान् तद्भयेन च पलायितः । यदा नागस्तस्य समीपमागतस्तदा स पुरुषः कुबेरालय इति कुबेरस्य–यक्षराजस्याऽऽलयः कुबेरालयः, अर्थात् न्यग्रोधनिकट–कूपे लम्बमानां वटवृक्षजटां जग्राह । एतावता भयेन व्याकुलः सन् कूपे लम्बमानां वटशाखां गृहीत्वा मध्य एव लम्बमानः स्थितः। तदनन्तरं स पुरुषोऽधो विलोकते तर्हि तस्मिन् कूपमध्ये



For Private and Personal Use Only

बृहत्कायांश्चतुरोऽजगरभुजंगानद्राक्षीत् । यदा चोपरि वीक्षते, तर्हि यां जटां स्वयमवलम्ब्य स्थितोऽस्ति तामेव जटामेकः कृष्णोन्दुरोऽपरश्च शुक्लोन्दुरुरित्थं द्वौ मूषकौ कृन्ततः । एतदवसरे गजेनागत्य वटवृक्षो विधूनितः । भूयो भूयोऽतिकम्पनेन तत्स्थात्क्षौद्रपटलान्मधुमक्षिका उड्डीय २ तं पुरुषं ददंशुः । क्षौद्रपटलश्चापि विशीर्णं, तस्मात् स्थित्वा २ मधुनो बिन्दवः पुरुषस्य भालमभिपेतुः । ततो मन्दं मन्दं प्रवहन्तस्ते बिन्दवस्तस्याधरं पस्पृशुस्तान् स जिह्वया लेढि तदा तन्माधुर्यमुपलेभे । पश्चात्सोऽसकृत् च्योतत्सु मधुबिन्दुषु प्रसक्तः पुरुषो विमानमधिरुह्य गच्छता केनाऽपि विद्याधरदेवेनाऽऽकारितः । भोः पुरुष ! त्वमिमं विमानमधितिष्ठ, व्रज चास्माभिः साकम्, अहन्त्वां व्यसनादस्मान्मोचयिष्यामि । इत्थं पौनःपुन्येनोक्तोऽपि यथा स पुरुषो मधुबिन्दुरसलुब्धो देवेन सह नो जगाम । तथैवायं सांसारिकजीवोऽपि संसारमध्ये मधुबिन्दुसदृशेषु विषयभोगेषु क्षणभंगुरेषु रतो देवविमानप्राप्तितुल्यं सद्धर्मं तीर्थंकरादिनोक्तं नाङ्गीकरोति। अत्रैवमुपनयमवतारयति–अस्मिन् संसारे चतुरशीतिलक्षयोनिरूपाऽटवी, तत्राऽनादिकालतो मिथ्यात्विनः प्राणिनो भृशं भ्रमन्ति, उक्ताटव्यां जरामरणमेव कूपो विज्ञेयः, तस्मिन् पृथक् पृथगष्टप्रकृतिस्वरूपाण्यष्टकर्माण्येव जलम्, पुनस्तत्र नरकतिर्यग्गतिरूपाजगरावतिदुःखप्रदौ चतुष्कषायरूपाश्चत्वारो बृहत्काया विषधराः, शुक्लकृष्णपक्षरूपौ मूषकौ मृत्युमतंगजकंपितस्यायुर्वटस्य जीवनजटां कृन्ततः, पुनर्वियोग–रोग–शोक–भोग–संयोगादय एव मधुमक्षिकादंशनानि सन्ति । तत एवं स्थितौ सद्गुरुरूपेण विद्याधरदेवेन धर्मविमानं संस्थाप्याकारिता अपि मधुबिन्दूपमेषु पंचेन्द्रियविषयभोगेष्वासक्ता मिथ्यादृष्टयस्तं सुगुरुमनादृत्योक्तविशेषणविशिष्टभवकान्तारमटन्तीति सम्बन्धो विज्ञेयो धीधनैः सज्जनैः ॥ २ ॥

यदुक्तं जम्बूस्वामिना स्वभार्यां प्रति दोहा—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जम्बूस्वामी बूझवे, म करो हठ मुझ नार । नर लुब्धो मधुबिन्दुए, तिम न रहूं संसार ॥ १ ॥
मधुबिन्दू संसार सुख, जाणी छांडूं आज । साधुपणुं ज विमान सम, लीजे अविचल राज ॥ २ ॥

अथाऽनेकान्तवाद्येकान्तवादिनोः २–कथानकम्—

तत्रैकान्तवादिनां पञ्चदार्शनिकानां पञ्चान्धैर्गजदर्शकैर्गजोदाहरणेन तन्मिथ्यात्वं द्रढयति—

पंचान्धा गजदर्शनार्थमगमन् कर्णांघ्रिशुण्डाद्विज–पुच्छान् वीक्ष्य गजो वदन्त्यय मियो दृष्टो मया कीदृशः ।
शूर्पस्तम्भकदल्ययोलकुटवच्चक्रुर्विवादं जडा–स्तद्वत्सर्वमतानुगा मदयुताः सर्वाङ्गवादी जिनः ॥ ३ ॥

कस्मिंश्चिदधिष्ठाने पंचान्धाः पुरुषा आसन्, ते करिणं विलोकितुं तत्समीपं ययुः । तदैकेनान्धेन गजः श्रोत्रदेशे हस्तेन परामृष्टोऽपरेणांघ्रिषु, तृतीयेन शुण्डादण्डोपरि, चतुर्थेनाग्रदन्तयोः, पञ्चमेन लांगूलप्रदेशे, एवं पाणिपरामर्शानन्तरं समुपेत्य मिथो मत्तगजाकृतिं वर्णितुं प्रारेभिरे । अथ तेषां मध्ये यो हि करेण गजकर्णममृक्षत् सोऽवदत्–शूर्पनिभो मातङ्गः, यः करिचरणमस्प्राक्षीत् सोऽवक्–द्विदन्तस्तु देवालयस्तम्भसदृशः, यस्य पाणौ शुण्डादण्डोऽभूत्स ऊचे -गजस्तु कदलीस्तम्भोपमः, यस्य हस्ते करिदन्तौ स जगाद–कुञ्जरो मुसलसंकाशः, लांगूलसंस्पर्शकश्चापि पंचमोऽब्रवीत्–नागस्तु वेणुरिव लक्ष्यते । एवं मिथो विवदमानास्ते मूढा अन्योन्यं जगर्हुः यत्त्वं मृषावाद्यसि, अहन्तु तथ्यमेव वच्मीति । तथैवाऽत्राऽन्येऽपि धर्मान्धाः कुमतिग्रथिला अर्हंभावपरीता जिनधर्मविमुखा अतोऽनर्गलं प्रलपन्तः पंचान्धसदृशाः कलनीयाः । तस्मात्सर्वाङ्गवाद्यनेकान्तपक्षिलस्त्वर्हन्मतमेव प्रधानत्वेन वरीवर्ति ॥ ३ ॥ तदुक्तं—



For Private and Personal Use Only

दोहा—षट् मत है संसारमें, पंच ते अंध समान । इक इक वस्तूने ग्रहे, जिनमत सर्व प्रधान ॥ १ ॥
काल सहावो नियई, पुव्वकयं पुरिसकारयं चेव । समवाए सम्मत्तं, एगंतं होइ मिच्छत्तं ॥ २ ॥

अथाऽऽहारानुकूलनीहारो भवति तदुपरि दीपकस्य ३—दृष्टान्तः—

संपृष्टा विभुनैकदा निकटगाः कृष्णं कथं कज्जलं ?, नो वर्त्यादिषु कालिमा किल ततः प्राहैकधीमान्नृपम् ।
ध्वान्तं भक्षति दीपकस्तु नृपते ! तेनैव कृष्णाञ्जन—माहारो भुवि यादृशो भवति वा नीहारकस्तादृशः॥ ४ ॥

एकस्मिन्नहनि केनचिद् भूपालेन स्वपरिषदि निषण्णाः सभ्याः पृष्टाः । यत्प्रज्वलिते प्रदीपार्चिषि कालिमा कस्माद् दरीदृश्यते ? यतो हि दीपे कार्पासवर्तिका तु धवला तत्र कार्ष्ण्यं निभाल्यते न । वह्निरपि रक्तं पैत्यं च बिभर्ति, तैलमपि पीतं, न ह्येतासु दीपसामग्रीषु कार्ष्ण्यं विद्यते, तस्मादस्मिन्नसितेन कज्जलेन बोभूयते, तत्किन्निमित्तं ? तत्रैकः कोविदः सभामध्यस्थितो राजानं प्रत्यूचे—भोः पृथ्वीपते ! प्रज्वलितो दीपस्तमस्तति़क्षयाय प्रभवति । यतः प्रदीपो ध्वान्तं भुंक्ते तत एषा कालिमा संजायते । लोकेऽपि श्रूयते-यादृश आहारस्तादृश एव नीहारः । अत्रायमभिप्रायो मनुजो यथा शुभाशुभं कर्म कुरुते तथैव तत्फलमश्नुते ॥ ४ ॥

उक्तं च—वर्तिस्तु धवला ज्ञेया, तैलं पीतं च दृश्यते । दीपो रक्तस्तया भाति, कज्जले श्यामता कथम् ?॥ १ ॥
यादृशं भुज्यते चान्नं, पच्यते जठराग्निना । प्रदीपेन तमो भुक्तं, नीहारोऽपि च तादृशः ॥ २ ॥

अथात्मश्लाघी गुणिषु न गण्यते तत्र सिंहसूकरयोः ४—दृष्टान्तः—

सत्रे क्रोडमृगाधिपौ च मिलितौ ब्रूते हरिं सूकरो, वादं त्वं कुरु रे! मया सह हरे! नो चेन्मया हारितः।
श्रुत्वा तद्वचनं हरिर्गदितवांस्त्वं याहि रे सूकर!, लोकान् ब्रूहि मया जितो मृगपतिर्जानन्ति मे ज्ञा बलम् ॥ ५ ॥

एकदा विपिनमध्ये वराहकेसरिणौ संगतौ, तदा मृगाधिपं सूकरोऽवोचत्–हे सिंह! बहुकालान्मां त्वं प्राप्तोऽसि, अतस्ते विवादो मया सार्धं बोभवीतु। अथ च वादं कर्तुं नो वाञ्छसि चेत्तर्हि जयपराजयनिर्णायकं वचनं व्याचक्ष्व। इत्थं निर्णये जाते सति व्रज, एवमाकर्ण्य कण्ठीरवो व्यचिन्तयत्–यदनेन हीनबलेन सह मे विवादोऽसाम्प्रतं, एवमालोच्य क्रोडं प्रति जगाद–भो वराह! त्वं गत्वा लोकान् भण, यदहं मृगेन्द्रं व्यजेषि। किन्तु रे क्रोड! ये बुद्धिमन्तो नरास्ते मे वपुर्बुद्धिबलं सम्यक्तया विदन्ति।५।
उक्तं चापि–गच्छ सूकर! भद्रं ते, वद सिंहो जितो मया। पण्डिता एव जानन्ति, सिंहसूकरयोर्बलम् ॥१॥

अथ कुसंगप्रसंगेन मृत्युस्तत्र हंसकाकयोः ५–दृष्टान्तः—

भूपो वृक्षतले स्थितस्तदुपरिस्थौ हंसकाकौ तदा, विट् काकेन कृता नृपोपरि शरं क्रोधान्नृपो मुंचति।
लग्नः पक्षिपतेर्गतश्च बलिभुग् हंसोऽपतद्भूतले, तं दृष्ट्वाऽऽह नृपो मयोज्ज्वलतरो दृष्टोऽद्भुतो वायसः ॥६॥

एकदा कश्चिन्नरनाथो वाजिवाहनो विश्रामाय द्रुमतलमधितष्ठौ। अस्मिन्नेव पादपे एको राजहंसोऽपरो वायस उभावपि पत्रिणौ स्थितवन्तौ। तयोः काको राज्ञ उज्ज्वलवेषं विलोक्य विष्ठामकार्षीत्। वस्त्रदूषकं वायसं दृष्ट्वा सकोपो भूपस्तूणीराच्छरं निष्कास्य चिक्षेप। तदानीमुड्डिड्ये तु काकः, बाणेन हतो हंसो महीपतेः पुरः पपात। वक्ति तमीक्ष्य राजा, न मयैवंविधः शुभ्रो वायसो जातु विलो-



For Private and Personal Use Only

कितः । अदृष्टपूर्व एषः, हंसस्तदोचे—राजन् ! नाहं बलिभुक्, किन्तूज्ज्वलो हंसोऽहमस्मि । परं नीचाश्रयेणेमां मृत्युदशामनुप्राप्तोऽस्मि । अतो भव्यजनैर्नीचप्रसंगः सदैव हेयः ॥ ६ ॥ पुनस्तदैवं हंसेनापि श्लोकोऽपाठि—

नाहं काको महाराज !, हंसोऽहं विमले जले । नीचसंगप्रसंगेन, मृत्युरेव न संशयः ॥ १ ॥
हंस तरन्तो देखिके, तुम किम तरियो कग्ग ? । तोरी यारी जे करे, तल शिर ऊपर पग्ग ॥ २ ॥

अथ नरः कृतकर्मफलमश्नुते तत्र चौरस्य ६—प्रबन्धः—

दुर्भेदाढ्यगृहेऽकरोन्निशि हरः खातं च पद्माकृतिं, तन्मध्ये क्षपितौ क्रमौ धनतृषा ज्ञातस्तदा स्वाधिपैः ।
चान्तस्थैर्ग्रहणं पदोर्निजजनैर्बाह्यैः कृतं हस्तयोः, खातान्तैर्निशितैः प्रपीडिततनुः संघृष्यमाणो मृतः ॥७॥

एकदा कस्याऽपि श्रेष्ठिनो गृहे तस्कराश्चौर्यं कर्तुमागताः । परं तद्धर्म्यमपि काष्ठफलकैः जटितमासीत् । तेषामेकश्चौरः पद्माकृति—कमलाकारं खात्रं कृत्वा धनगृध्नुस्तस्याऽन्तर्द्वावपि चरणौ चिक्षेप, तदानीं गृहपतिर्जजागार । तस्मिंश्चानुशायिभिर्मनुजैस्तत्पादयुग्मं जगृहे । ततः स सजातीयानन्यानप्याहूय निजगाद, भोः ! निगृहीतोऽस्मि निष्कासयत माम् । तच्छ्रुत्वा ते तत्करौ निगृह्य चकृषुः । तदनन्तरेऽन्तःस्था जना अन्तर्गृहं बहिःस्था बहिश्चाकर्षन्ति । एवमुभयतोऽन्योन्याकर्षणेन कमलाकारसन्धिमध्ये निशितशर्कराभिश्चौरो विव्यथे क्षतांगः संश्च ममार । तस्माज्जनेन यादृशं कर्म क्रियते, तादृशमेव फलं भुज्यते ॥ ७ ॥

तथा चोक्तम्—यादृशं क्रियते कर्म, तादृशं प्राप्यते फलम् । यथा प्राप्तं तु चौरेण, हस्तखातकृतेन वै ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तथोत्तराध्ययनेऽपि—तेणे जहा संधिमुहे गहीए, सकम्मुणा किच्चइ पावकारी ।
एवं पया पेच्च इहं च लोए, कडाण कम्माण न मुक्ख अत्थि ॥ २ ॥

अथ प्रत्युत्पन्नधिया नष्टमपि वस्तु पुनरुपलभ्यते तत्रर्क्षमनुजयोः ७—कथानकम्—

कस्याऽप्याध्वनिकस्य सत्रमिलितो भालुस्तदा तच्छ्रुती, द्वे गृह्णाति तदम्बरं दितमतस्तस्याऽपतन्नाणकम् ।
तत्राऽऽगत्य जडः किमस्त्ययमिति प्राह स्म वक्त्रादिदं,स प्राहाऽस्य मुखं प्रदेहि सुमते ! तेनाऽऽशु दत्तं करे ॥८॥

कदाचिदटवीमध्ये गच्छतः कस्याऽपि पान्थस्य भालुर्मिलितः । ततः स इंगितैर्जिघांसुं तं विदित्वा तस्योभे श्रोत्रे जग्राह । ऋक्षस्ततो किमपि कर्तुं न शशाक । अपि च मिथो बाहूबाहवि प्रकुर्वतोस्तयोः पथिकस्य वस्त्रं छिन्नं, तदा तस्य कटिस्थले सुनद्धा स्वर्णमेखलाप्यपतत् । तस्मिन् क्षणे केनाऽपि मन्दमतिनाऽऽगत्य पृष्टं—भोः ! किमेतत् पतितमस्ति ? तदा प्रत्युत्पन्नमतिना तेनोक्तम्—ऋक्षस्य कर्णौ निगृह्याऽऽमर्दितस्य मुखाद्विनिर्गतं जातरूपमेतत् । तन्निगदितं तथ्यमेव मन्वानः स मूढः प्रोवाच—हे सुमते ! अस्य श्रुती मामपि ग्राहय । ततोऽविलम्बमेव स तद्धस्ते तत्कर्णावग्राहयत् स्वं हिरण्यं च ररक्ष ॥ ८ ॥

उक्तञ्च—शीघ्रमुत्पद्यते बुद्धिः, सा बुद्धिः फलदा मता। भालुकर्णौ करे दत्त्वा, पान्थेन रक्षितं धनम् ॥ १ ॥

अथ प्रत्युत्पन्नसुमतिर्नरः सर्वत्र पूज्यते तत्र ८—दृष्टान्तः—

केचिद्राजकुलं ययुस्त्रिपुरुषा भूपेन ते तत्कलाः, पृष्टा ऊचुरथोत्तरोत्तरकलाः पश्चात्सभार्यां पृथक् ।
कूर्चं ते ह्यसितं कथं तव सितं? सोऽवग्जरापाण्डुरं, चान्योऽस्मादितरं प्रधावनसितं कूर्चं न मात्रंगकात्॥९॥



For Private and Personal Use Only

कदाचित्त्रयः पुरुषा भृत्यर्थं राजसमीपं ययुः । भूपस्तेभ्यः पप्रच्छ–कस्मिन् कर्मणि यूयं निष्णाताः ? तदा त्रयोऽप्यचकथन्, हे स्वामिन् ! वयं कस्याऽपि गूढप्रश्नस्याऽविलम्बमेव प्रतिवचोदायिनीं कलां जानीमहे । एतन्निशम्य भूपालो भृतिकर्मणि तान्न्ययोजयत् । अथैकदा नृपस्तान्परीक्षितुं सदसि समाहूय त्रिप्रश्नान् पप्रच्छ । प्रथमोऽभाणि भूपालेन–किं भोः ! ते कूर्चिकाकेशाः श्यामाः, मस्तकस्थाश्च सितास्तस्य किं कारणम् ? ततः स प्रत्युवाच–प्राप्तयौवनस्य जनस्य कूर्चिकाः समुत्पद्यंते । शिरोलोमानि तु जातमात्रस्यैवातो गरीयस्त्वात्तेषां शुक्लता । अथाऽपरमब्रवीत् कस्मात्ते कूर्चिका शुभ्रा, शिरः कचश्च कृष्णः ? सोऽवादीत् हे राजन् ! कूर्चिका भृशं प्रक्षाल्यते, अस्मादेवोज्ज्वला । तृतीयमप्राक्षीत् भद्र ! तव श्मश्रूणि कस्मान्न विनिर्गतानि ? तेन व्याहृतं–जायमानो वै शिशुर्मातृसमः पितृसमो वा भवति । तस्मादहं जननीमेवाऽनुगतोऽस्मि । ततो हृष्टेन राज्ञा बहुमानितास्ते सुखेन तस्थुः ॥९॥

तथा चोक्तम्–न दृष्टं न श्रुतं येन, प्रश्ने पृष्टे तदुत्तरम् । दीयते स महाप्राज्ञ–स्त्रिभिर्दत्तं नरैर्यथा ॥ १ ॥

अथ हतविधिना जनेन पुरःस्थितमपि वस्तु नासाद्यते तत्र ९–दृष्टान्तः—

काष्ठार्थं ह्यधनौ च गच्छत इतो गौर्या तु दृष्टौ तदा, प्राहेशं च सुखीकुरु त्वमबले! भाग्यं तु नैवैतयोः।
तद्यूयं कुरुतेति मुंचति तयोरग्रे यदा कुण्डलं, भूमावन्धगतिं तदाऽग्रचलतावन्धाविवापश्यताम् ॥ १० ॥

कौचिदधनौ जायापती समिन्धनमाहर्तुमगमताम् । ततस्तौ दृष्ट्वा करुणापरा भवानी भूतपतिं बभाषे–हे प्राणनाथ ! इदं निःस्वं दम्पतियुगलं वसुभाजनं कुरुष्व महेशः प्रोवाच–भो अबले ! सुन्दरि ! कथमिदं क्षीणप्रारब्धं जम्पतियुगलं शर्मभाजनं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





करोमि ? तदा रुद्राण्याऽभाणि भवांस्तौ वितन्वतौ कर्तुं कामयेत तच्छक्येतां भवितुं। शंकरः प्रियावाचमङ्गीकृत्योभे स्वकर्णकुण्डले वर्त्मन्यपातयत्। तदा तौ हतभाग्यौ पुंमिथुनौ व्यचिन्तयतां, यत्क्षीणलोचनो जनोऽध्वनि कथंकारं ढौकते ? आवामपि तदनुभूय पश्यावः, एवं विचिन्त्य द्वावपि चक्षुषी निमील्य चलितुं प्रवृत्तौ। अतः पथि पतितं कुण्डलं तयोर्दृष्टिगतं नाभवत्। अथ कतिचित्पदानि गत्वोन्मील्य नेत्रे पश्यतः। इदमाकूतम्–हतभाग्यस्त्रीपुरुषयोः कुण्डलप्राप्तिस्थले एव कथमन्धाः प्रचलन्तीति शेमुषी समुत्पन्ना ॥१०॥

उक्तञ्चापि–भाग्यहीना न पश्यन्ति, नयनाऽग्रेपि मानवाः। दम्पतिभ्यां यथा मार्गे, न दृष्टं कर्णभूषणम् ॥१॥

अथ भूपेप्सितकर्त्ता सचिवो राज्ञा सत्क्रियते तत्र १०–दृष्टान्तः—

मूत्रं राङ्कुरिणा कृतं च विपिने गत्वाऽऽगतस्तत्स्थितं, दृष्ट्वा चिन्तितवान् सरो भुवि भवेत्तल्लक्षितं मंत्रिणा।
तेनाऽऽगत्य सुकारितं यदि नृपः प्रोचे तदा मंत्रिणं, केनात्रेदमतो मया स नृपते ! चित्तेप्सितं यत्त्वया ॥११॥

कश्चिद्राजा विपिनं गतस्तत्र तद्वाजिना मूत्रोत्सर्गेण गोष्पदो गर्तः समपूरि। ततो धरापतिः परिभ्रम्य वनादावर्तमानो भूतले तदशुष्कं वारि विलोक्य चिन्तयामास ' यदत्र भूभागे कासारोऽभविष्यत्तर्ह्युदकं नाऽशुष्यदिति। राज्ञा विचिन्तितं मानसिकं कार्यं सचिवोऽप्यबुद्ध। ततः स वनमुपेत्य कतिचिदह्नः पश्चात्तत्र तडागमकारयत्। अल्पेष्वेव घस्रेषु तस्मिन्नेव धरातले प्राप्तो नृपो जलाशयं प्रेक्ष्य गदितुमारेभे। केनैतत्खानितम् ? तदा मंत्रिणा प्रोक्तम्–राजन् ! मयैषः खानितः सरोवरः। तच्छ्रुत्वा नरपतिर्मन्त्रिणमूचिवान्–भो मंत्रिन् ! त्वमस्माकं मनोगतं बुद्धयसेऽतः कुशाग्रबुद्धिरसीत्युक्त्वा नृपेण बहु द्रव्यं दत्त्वा स सत्कृतः ॥ ११ ॥

तथा चोक्तम्—अन्येन चिन्तितं कार्यं, जानाति स विचक्षणः। महामंत्री भवेद्राज्ञो, यथाऽभूत्स सरस्करः ॥१॥



For Private and Personal Use Only

### मूर्खोक्त्याऽचेतनस्यापि कोपो भवति तत्र ११–कथा—

स्थित्वैकः कृतिहट्टके जडमतिः प्राहानृतार्थां कृतिं, हट्टस्थाः समशैलकाः सुचालिताः श्रुत्वा जडस्योदितम् ।
क्रोधात्तेऽकथयन्नरे जडमते! त्वं याहि वक्त्राग्रतो, हस्ते कोऽपि बलं ददाति हि करिष्यामो रदोत्पाटनम्॥१२॥

कश्चिन्मन्दमतिः कोविदापणे स्थित्वाऽतथ्यां गाथामवादीत् । तद्वेलायां प्राज्ञस्तु कार्यान्तरेण कुत्राऽपि गत आसीत् । परं मन्दमतिनिगदितामपगाथां निशम्य तत्र निहितानि पंचसेटकप्रभृतीनि शैलमानानि भृशं चुक्रुधुः, निगदितवंति च रे बालिश! त्वमितः प्रयाहि । वयं बुधस्य शैलमानानि स्मः, अस्मदग्रेऽपगाथां मा ब्रूहि । एवं स्थिते सति कदाचित् ब्रह्मा नः करे बलमादधीत । तर्हि ते दशनद्वात्रिंशिकां समूलमुन्मूलयेम ॥ १२ ॥ पठ्यते चाऽऽपि—

गाहा भणइ गमारो, पत्थरा थरहरन्ति हट्टमज्झंमि । पाडेमि दंतपंतिं, चउक्क जे को हत्थ बलं देइ ॥ १ ॥

### अथ मूर्खस्य बालिशत्वं विदेशेऽपि न निलीयते तत्र १२–दृष्टान्तः—

कंचित्स्वेष्टजना वदन्ति जड रे! त्वं गच्छ तिष्ठाऽथवा, श्रुत्वा नागरिकास्तथाहुरखिला रोषाद्विदेशं गतः ।
दत्त्वाऽऽस्ये स करं जलं पिबति तत्पूर्णोदरो मस्तकं, नार्याकंपयति प्रवीक्ष्य हि जडोऽसि प्राह कैर्लक्षणैः?॥१३॥

कंचिन्मूढं तदात्मीया जनाः सम्बोधनवेलायां रे जड! त्वमत्रोपविश, याहि वेति प्रवदन्ति । इत्येवमाकर्ण्य तत्रत्याः पौरजना अपि तमनयैव संज्ञया व्याहरन्ति । तस्मात्स सरोषो विदेशान्तरं जगाम । पथि नगरोपशल्ये तृषितस्तत्र श्रमदर्घट्टकं यन्त्रं दृष्ट्वा मुखे हस्तपुटमाबध्य पानीयं पातुमारेभे । उदरपूरं पयः पीत्वाऽपि लपनात्पाणिं नाऽपाकर्षत् शिरो विधूनितुं च प्रवृत्तः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तद्विलोक्य जलवाहिकाः समवोचन्—अरे ! नस्त्वं मूढः प्रतिभासि । मातृश्वासितः समपृच्छत् भवतीभिः कैर्लक्षणैर्मे मौढ्यं कलितम् । ततस्ता ऊचुः—अञ्जलिपुटं मुखादपनयसि न, शीर्षञ्च विधूनयसि ततो निर्भाग्यः संलक्षितोऽसि ॥ १३ ॥

उक्तमपि—स्वदेशे परदेशे वा, यत्र गच्छति निर्मतिः । तत्राऽपि प्रकटं भावि, यथा मस्तककंपकः ॥ १ ॥

अथ मूर्खशिष्यो न कर्तव्यस्तत्र कस्यचिद् यतिशिष्यस्य १३—दृष्टान्तः—

पूःस्थौ शिष्यगुरू विनेयक इतो भक्तात्सुलब्धा वटा, द्वात्रिंशत्प्रमिताश्च चिन्तयति मेऽर्द्धान्पञ्चकृत्वो गुरोः ।
सोऽर्द्धानात्ति तदाध्वनीह वटकस्तस्येक्षितोऽन्याःक हे!,जग्धाः पूज्य! मया कथं? निजमुखे निक्षिप्य शेषोऽदितः।१४

कस्मिंश्चित्पत्तने यतिस्तच्छिष्यश्चोभावपि न्यवात्ताम् । एकदा शिष्यो भिक्षामटितुमाट, तत्र कोऽपि भक्तजनो द्वात्रिंशद्-वटकानदात् । मार्गमध्ये भिक्षुश्चिन्तयामास—विभक्ते सति गुरोः षोडशवटकास्तत्रशिष्यन्ते, शेषांश्चाद्मीति चिन्तयन्नेव जघास । मनागेव चलितः पथि व्यचिन्तयत् । गुरोस्त्वविदितमस्ति, तस्माद् गुरवे विभज्य निहितेभ्यो वटकेभ्यः समविभागमश्नामीति विमृशन्नेवाश । पुनरीषन्मार्गमतिक्रम्य यावद्गच्छति तावच्चतुरो वटकानपरानभुंक्त । इत्थमेव क्रमेण द्वावेक इति कृत्वा भुञ्जतस्त-स्यैकवटक एवाशिषत् । पश्चादुपाश्रयमियाय, तदा गुरुणा भिक्षाऽमत्रं निभाल्य पृष्टः । भोः शिष्य ! एक एव वटकः केनोपाहृतः । शेषाश्च क्व गताः ? शिष्यस्तदा प्रोवाच—भगवन् ! अर्धमर्धमिति भागं परिकल्प्यैकत्रिंशद्वटकानहममक्षयम् । गुरुणा पृष्टः—कथमखादीः ? तदाऽऽननं व्यादाय वटकमेकं निक्षिप्य गुरुमचकथत् । पश्यत्वार्य ! एवंकारमशितमिति ॥ १४ ॥ कथितञ्चापि—

मूर्खशिष्यो न कर्त्तव्यो, गुरुणा सुखमिच्छता । विडम्बयति सोऽत्यन्तं, यथा हि वटभक्षकः ॥ १ ॥



For Private and Personal Use Only

अथ निर्घृणस्वजनात्करुणापरश्चौरोऽपि वरस्तस्योपरि १४–दृष्टान्तः—

चौरो निःस्वगृहे गतो हिमनिशि प्राह प्रियं स्वाबला, त्वत्पार्श्वेऽम्बरखण्डकं झटिति वा तद्देहि लात्वर्भकम्।
नो गृह्णाति शिशुं ददाति न तदा द्वन्द्वं च जातं तयो-स्तच्छ्रुत्वाऽम्बरकं शिशूपरि हरः क्षिप्त्वा गतोऽन्यालये॥१५।

कश्चित्तस्करः शरत्काले कस्याऽप्यधनस्य निकेतने विभावर्यां स्वं मोषितुं जगाम । तदानीं सदन उभे दम्पती अशयिषाताम्, पश्चाद्धिमव्यथिता स्त्री प्राणेशमवादीत् । त्वत्सन्निधौ वासःखण्डश्चेत्तर्हि मह्यमर्पय, हिमजडं शिशुं वा गृहाण, परं सोऽर्भकमपि नाऽगृह्णान्न चाम्बरशकलमेवाऽदात् । ततो मिथो युध्यमानौ तौ दृष्ट्वा सदयश्चौरः स्वानि वासांसि बालकोपरि प्रचिक्षेप ॥१५॥
तत्पठ्यतेऽपि—

दयायुक्तो दरिद्रोऽपि, दस्युर्हि सुखकारकः, । प्रविष्टे हि यथा गेहे, चौरेणाप्यर्पितं पटम् ॥१॥

अथ कार्यसिद्धेः प्राग् द्वन्द्वोपरि स्त्रीपुंसोः १५–दृष्टान्तः—

कोऽप्याह स्ववशां च लामि महिषीं त्वं साशु नायाऽऽनय, मातुर्दुग्धतरीं ददामि हि तदाऽन्योन्यं विधत्तः कलिम् ।
श्रुत्वाऽऽगत्य विशारदेन हि घटा भग्ना महिष्याऽऽद ते, क्षेत्रं मे यदि भक्षितं न ललने! यूयं कथं युद्ध्यथ।१६

कश्चिन्नरः स्वायत्तां सीमन्तिनीमूचे–हे प्रिये ! महिषीमहमानयामि । तदा जाया जगाद–भो भर्त्तः ! क्षिप्रमाहरेत्युदीर्याऽवक् यदहं महिष्याः पयः पूर्णां क्षीरसन्तानिकां स्वजनन्यै प्रदास्यामि पत्या चोक्तमहं भोक्ष्ये । एवमुभयोरपि वाक्कलहः प्रादुर्बभूव । तत्क्लेशप्रशमकः कश्चित्सुधीस्तत्राऽऽगत्य सदनमध्यस्थापितानि मृद्भाण्डानि बभञ्ज । तदा स्त्रिया सोऽभिहितः–भोः ! कस्मादमूनि



For Private and Personal Use Only

पात्राण्यभांक्षीः ? ततोऽभ्यधायि तेन—अस्मत्क्षेत्रं तव महिष्या खादितम् । ततो द्वावपि कलिं प्रशाम्य कथितुमारेभाते । भगो ! महिषी काऽऽनायिताऽस्ति सांप्रतम् । ततः प्राज्ञेनोक्तम्—महिष्या ऋते दुग्धतरीमुद्दिश्य कस्माद् विप्रवदथो युवाम् ? तत्क्षणे तेनोभावपि विद्वद्वाक्यं हितकरं मन्यमानौ सर्वत्र हास्यजनकं निष्प्रयोजनं निजकलिं त्वरितं विहाय मिथो बद्धानुरागावभूताम्॥१६॥यतः—

दोहा—घरे भेंस आणी नहीं, भांग्या भांडा सात, झगड़ो तो दम्पती करे, दूध तरीनी बात ॥ १ ॥

एनो तो झगड़ो सुणी, पण्डित आयो दोड़ि, झगड़ो तेणे भंजियो, डोबर सघला फोड़ि ॥२॥

अथ कौतुकिनः सविधे विदुषोऽपि विद्या मोघा भवति तत्र १६—दृष्टान्तः—

भूपान्ते द्रविणेच्छया कृतिगमे दत्तं न किञ्चित्कदा, वीक्ष्येशो नटनाटकं बहुधनं तस्याशु सोऽदादतः ।
गेहेऽवक् स्वजनान्न तत्र पठने यत्नस्तु कार्यो विदा, कर्तव्यं नटनाटकं च भवतां द्रव्यं नृपो दास्यति ॥ १७ ॥

कश्चिज्ज्ञो द्रविणेच्छया कस्याऽपि धरणीधवस्य सकाशं सेवितुं गतः । उर्वीशं सेवमानस्य तस्य घना घस्रा व्यतीयुः । परं वित्तगन्धोऽपि नाऽऽसादितः। एतस्मिन्नन्तरे जातु नृपतिर्नटानां नृत्यं च निभाल्य प्रीतः सन् प्रभूतं स्वं ददौ। इत्थं भूभुजश्चरितमालोक्याऽश्रुनेत्रो ज्ञः समचिन्तयत्। यदस्मदधीता सर्वा विद्या वृथैव जाता। ततः सहसैव निजावासमेत्य स्वशिष्यांश्च वक्तुमुपचक्रमे। पदप्रमाणकाव्यच्छन्दोऽलंकारादीनध्येतुं किमर्थं परिश्राम्यथ, यतस्तेभ्यो न प्रसत्स्यति कदापि प्रजानाथः। किन्तु नटनाटकादीननुशीलयिष्यथ तर्हि राज्ञः सकाशादनल्पं द्रविणमाप्स्यथ । यतः सारासारविवेकक्षमो नास्ति महीपालः, किंतु कौतुकवीक्षणपरः ॥ १७ ॥ उक्तं च—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विद्वांसः ! सावधानाः शृणुत मम वचो द्रव्यलोभार्थिनश्चे,द्गन्तव्यं सादरेण क्षितिपतिभवने भूपसेवां विधातुम्।
मीमांसान्यायतर्काऽऽगमविधिबहवो दूरतो वर्जनीयाः,शिक्षितव्यास्तु शिष्याः। धिगधिगधिग तां तायपीति प्रशब्दाः

भावी भवत्येव तत्र नरकपालस्य १७-दृष्टान्तः—

कंनेभ्येन बहिः स्थितेन नृशिरो दृष्ट्वाऽऽर्यकाऽवाच्यत, लात्वा सद्मनि तच्छिरः प्रतिदिनं तत्पश्यति ह्येकदा ।
तत्पिष्ट्वा वटिका कृता निजपतेर्मुक्तात्ति सोऽवक् शुभा, स्वेष्टं यत्त्वभवद् वरांगि ! लिखिते दोषो न ते मे वशे

एकदा बहिर्यातेन केनाऽपि श्रेष्ठिना शवभुवि पतितं नरकपालं ददृशे। तत्र लिखितगाथावाचनानन्तरं तत्कपालमानीय स्वपेटायां संस्थाप्य तत्कपालं प्रतिदिनमेत्य समपश्यत् । एकदा तत्पत्न्या विलोक्य चिन्तितम्–निजगृहे असावस्माकं स्वामी प्रतिवासरं किं वस्तु वीक्षते ? तदा पश्यन्त्यास्तत्र शवकपालं दृष्टिपथमयासीत् । ततो रोषपरीतमानसा सा तत्कपालमादाय तनु संपिष्य तस्मिन्नन्यानि तद्योग्यवस्तूनि मेलयित्वा वटिका व्यरीरचत् । ततस्तया स्वभर्त्रे शाकं निर्मितमशनवेलायां तत्स्वादमास्वाद्य तत्पतिः प्रीतः सन्नाचचक्षे। यदिमा वटिकाः स्वादुतमाः संपन्नाः । कस्येमाः संस्कृताः ? तदनु तयोक्तम्–यद्भवतः प्रियतरमासीद्यं च पुरो धृत्वा पश्यति स्म, तस्येमा वटिकाः सन्ति । धनिकोऽवदत्–भो ललने ! यल्लिखितं तद्वृत्तमत्रावयोर्नास्ति दोषलेशोऽपि । पश्चात्सीमन्तिन्या आमूलचूलतः सर्वमप्युदन्तजातं निवेदितम् ॥ १८ ॥ सांप्रतं कपाले यद्विन्यस्तमासीत्तदभिधीयते । गाथा—

जम्मो कलिंगदेसे, पाणिग्गहणं मरुदेसमज्झंमि । मरणं समुद्दतीरे, अज्ज वि किं ते भविस्सइ ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ कविः प्रश्नक्षण एव प्रतिवक्ति, तत्र १८–दृष्टान्तः—

पृष्टः केन गुरुर्हि खिद्यति मनो नेत्रं कथं रोदिति ?, प्रोचे तं च गुरुर्मनोनयनयोर्नो व्यञ्जनावग्रहः ।
वेदाक्षप्रकरः पृथग् भवति तद्वर्ज्यं मनोनेत्रयोः, मर्त्यावेकगृहे स्थितौ समसुखं लग्नाति दुःखं तयोः ॥ १९ ॥

कश्चिच्छ्रावको गुरुमप्राक्षीत्–भगवन् ! यदा चित्तं विषीदति, तदा चक्षुषा कथं रुद्यते ? तच्छ्रुत्वा गुरुणाऽभिहितम्–श्रोत्रघ्राण-रसनात्वच इति चत्वारीन्द्रियाणि यदा पुद्गलमास्पृशंति तदा विषयावबोधे प्रभवन्ति, तस्मात्तद्व्यञ्जनावग्रह इत्युच्यते । अन्तःकरणचक्षुषोर्विषयः पुद्गलस्पर्शमन्तरैव ज्ञायते, तदर्थावग्रह इत्युच्यते । तस्मान्मनसश्चक्षुषोश्च प्रीतिसंबन्धो भूयांस्ततो यदा मानसेन निर्विद्यते तदा लोचनेन रुद्यते । यथैकस्मिन् सदने निवसन्तौ द्वौ मनुजावितरेतरव्यसने प्रसादे च समवेदनौ भवतस्तथैवान्तःकर-करणनयनयोश्चैकमेव वासस्थानं ॥ १९ ॥ तदुक्तञ्च—

सिद्धान्तशास्त्रकेष्वस्ति, नास्ति वा हि तयाऽपरे । सम्यक् प्रश्ने कृते शीघ्रं, प्रददात्युत्तरं कविः ॥ १ ॥

अथाऽज्ञातकुलशीलाय वासो न देयस्तत्र यूकामत्कुणयोः १९–दृष्टान्तः—

सुप्तो राड् निशि मत्कुणो गत इतोऽभूद्यूकया वारितः, प्राघूर्णोऽस्मि तवेति मातृभगिनि ! प्रोचे तया मानितः।
तेनेशो दशितस्तदा नृपतिना शय्या हि चालोकिता, लब्धा षट्पदिका हि मत्कुण इतस्तेनाशु सा मारिता॥२०॥

कस्याऽपि राज्ञः पर्यङ्के मन्दविसर्पिणी नाम यूका निवसति स्म। तत्रैको दुन्दुकनामा मत्कुणोऽभ्यैत्। तमालोक्य यूकयोक्तम्–



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भोस्त्वमत्र मा प्रविश। निद्रानिमग्नोऽस्माकं स्वामी शेते। तदा मत्कुणोऽवादीत्–अये! अहं तव गृहं प्राघूर्णकः समायातोऽस्मि। अथ च त्वम्मे मातृष्वसाऽसीति कृत्वा प्राप्तोऽहं। अथाऽविमृश्यैव यूका तत्प्रवेशमादिदेश। मत्कुण उपक्रामन्नेव त्रिशांपतिं ददंश। ततो नरपतिना शय्या दर्शिता तु मत्कुणः पलायितो, यूका सरला वराकी करे पतिता, नृपानुगैः करेण हता, अतोऽज्ञातकुलशीलो मधुरां वाचं वदन्नपि स्वान्तिकं न प्रापणीयो यश्च तं विश्वसेत्तर्हि मत्कुण इव स स्वात्मदोषं तस्मिन्निक्षिप्य तमेव नाशयेत॥२०॥ यदुक्तम्–

अज्ञातकुलशीलस्य, न दातव्यः प्रतिश्रया। ढुन्ढुकस्याऽपि दोषेण, हता मन्दविसर्पिणी॥ १॥

**अथ च्छलेन मुग्धा लोका वञ्चयन्ते परैस्तत्र २०–दृष्टान्तः–**

**गुर्विण्यां निजयोषिति क्षितिपतिर्विप्रं तदा पृच्छति, पुत्रः किं च सुता भविष्यति हि मे? पुत्रो नहीत्यंगजा। संलिख्य च्छदने ददौ नरपतेः पुत्रो भविष्यत्यथ, पुत्री चेद्रुत वाशु दीर्घलघुकान् वर्णास्तु वक्ष्ये तदा॥२१॥**

कस्याऽपि भूजानेः सुतो नाऽभवत्, परमेकदा तत्पुण्यप्राबल्यसंयोगेन महिषी अन्तर्वत्नी समजायत। तदा राज्ञा कश्चिद् भूसुरः पृष्टो द्विजवर! मम पत्न्या जठरे पुत्रो भविता वा पुत्री? तदा व्याजेनावादीद् द्विजः–भो राजन्! कर्गले कृत्वाक्षराणि तव प्रदास्यामि, नृपस्तदुदीरितमुररीचकार प्रीतश्चाऽभवत्। ततो विप्रश्चिन्तयामास–'पुत्रपुत्र्योर्मध्ये केनाऽपि भवितव्यमेवेति विविच्य' पुत्रो न पुत्रीति विलिख्य राज्ञे कपटलेखमर्पयत्। यदि पुत्रश्चेत्तर्हि 'न पुत्रीति स्पष्टमेवोक्तम्,' अथ पुत्री जायेत, तदापि पुत्रो नेति पठनीयमुभयतोऽपीष्टसिद्धेः॥२१॥ तथा चोक्तम्—

**अज्ञाना बहवो मर्त्या, दृश्यन्ते छलकारकाः। छलं कृत्वा यथा राज्ञो, दत्तं लेखं द्विजेन वै॥ १॥**

For Private and Personal Use Only

अथाऽदातरि याचकयाञ्चा मोघा जायते, तत्र २१-कथा-

द्वारस्थं गजचित्रकं ह्यलिरिहाऽऽदानस्य दृष्ट्वाऽऽगतः, तद्गण्डे स्थितवांस्तदाह कविराड् ध्यात्वाऽऽशु तं षट्पदम्।
अत्राऽऽलेक्षि कथं स्थितोऽसि जड रे! दानप्रदा वारणा-स्ते सर्वेऽपि वने वसन्ति च गिरौ त्वं तत्र याहि द्रुतम्।२२।

कश्चिन्मधुकरो द्वारदेशे चित्रस्थं करिणं विलोक्य विवेकवैकल्याद् मदगन्धमाघ्रातुं तत्राऽयासीत् । अथ च गजगण्डस्थलमासीनः कलं जुगुञ्ज। तस्मिन् क्षणे कश्चित्कविः स्वात्मनि विचार्य भ्रमरं वक्तुमुपचक्राम। रे मूढ मधुलिट् ! त्वं कस्मादत्र निषण्णोऽसि, अस्मात्ते प्रयोजनं न सेत्स्यति । मदप्रदायको वारणो नाऽसौ, दानवारिमुचः सर्वेऽपि गन्धहस्तिनो विपिने कुञ्जेषु वा वसन्ति । करिदानगन्धलिप्सा चेत्तर्हि मंक्षु तत्रैव प्रयाहि ॥२२॥ गीतमपि—

रे चंचरीक ! मदलोलकपोलवासी, भित्तिस्थनागवदनेऽत्र कथं स्थितोऽसि ? ।
ये दानदा घनघना घनघोरशब्दा-स्ते वारणा वरतरा विपिने वसन्ति ॥ १ ॥

अथ मूर्खैः सह धीमतां वादो न युज्यते, तत्र तयोः २२-कथा-

मूर्खज्ञौ पथि गच्छतः कुसुमितं ताभ्यां पलाशद्रुमं, दृष्ट्वा वक्ति हि पाटलं जडमतिर्ज्ञो मूर्ख ! नो पाटलः ।
वादं तौ कुरुतो जडेन सुकविर्यष्ट्यादिभिस्ताडितो, यष्ट्या मुष्टिवशाद् विमुंच जड रे भोः! पाटलःपाटलः।२३।

पुरा कदाचिद् बालिशकोविदौ वर्त्मनि व्रजतः स्म । तत्र मार्गमध्ये पुष्पितः किंशुकपादपो व्यलोकि । तदा कुधीर्वक्ति-



For Private and Personal Use Only

एष पाटलः कथं कुसुमितः फलितश्च ?। तन्निशम्य बुधोऽवदत् रे मातृशासित ! एष पालाशविटपो, न पाटलः। ततो मन्द ऊचेत्वं किं जानीषे ? एष तु पाटलः। इत्थं मिथो विवदितुं प्रारेमाते। ततोऽतीव रोषविवशो बालिशो यष्टिमादाय प्राज्ञं हन्तुमुद्यतस्तदानीं पण्डितेनाऽवादि–भोः ! कथं मां तुदसि ? अथ च कविरपि पीडनवशात्पाटलः पाटल इति मुहुर्व्याजहार ॥२३॥ अत एवोक्तमपि–

पलाशं पुष्पितं दृष्ट्वा, मूर्खो वदाति पाटलम् । यष्टिमुष्टिप्रसादेन, ज्ञोऽवक् पाटलपाटलः ॥ १ ॥

मूर्खदम्पत्योः कदाचरणोपरि तयोः २३–कथानकम्—

लात्वा स्त्रीं पथिको गृहात्प्रचलितो ह्यग्रे सनीरां नदीं, दृष्ट्वा साऽऽह धवं ममांघ्रियुगले रंगोऽस्ति संगृह्य सः।
तस्याः पादयुगं हि कर्षति सरित्तीरे गतः सा मृता, न्यस्ता मूढ ! कृतं किमाह मतिमान्नष्टा न रंगास्थितिः ॥२४॥

अथ कश्चिदाध्वनिकः स्वकान्तां श्वशुरसद्मनः समादाय स्वावासं प्रति प्रस्थितः। मार्गे यान्त्या सरित्प्रवाहं प्रपश्य प्रियया स्वामिनं प्रत्युक्तम्–भोः प्राणनाथ ! ममाऽङ्घ्रियुगले निषक्तो रंगो यथा नापमृज्येत तथा विधीयताम्। तदनु ना तच्चरणावुत्पाट्य करनासं जले न्यस्य चलितः। यावत्स स्रवन्तीपारं प्राप्तस्तावदेव सा नासाऽऽस्यश्रुतिषु पयःपूरेण कीनाशनिकेतनमभ्यैत्। तदा गतासुमहिषीमिव समाकृष्य सरित्तटमानिनाय। तत्र स्थितः कश्चिद्धीमान्नरस्तमचकथत्–रे मूढ ! किमेतदनुष्ठितम् ? यस्मादेषाऽचेतना संवृत्ता। तस्मात्कथमेनामधोमुखीं नीरमध्यादानीतवानसि। मन्दप्रज्ञेनाऽप्यवादि–यदहं कृतवानस्मि तदवगत्यैव यद्यपि ममार सा परं तच्चरणयो रंगस्थितिस्तदवस्थैव ॥२४॥ कथितञ्चाऽपि—

मूढ़बुद्धि मारी प्रिया, गया नदीरे तीर । देख अन्य नर डांभियो, कां कीना जड़ पीर ? ॥ १ ॥
मूढ़ तेह प्रति बोलियो, कीधो एह प्रकार । जीव गयो पण रंग है, मुझ मन एह विचार ॥ २ ॥

भाग्यरहितो यत्र गच्छाति तत्रैवापदो यान्ति तत्र २४—कथा—

ग्रीष्मे बभ्रुरथो वने विवसनः प्राप्तोऽर्चिषा पीडितः, छायां वीक्ष्य गतोऽपि बिल्वसुतले तत्के फलं प्रापवत् । तच्छ्रुत्वा पततीति चिन्तति तदा यामि क भग्नं शिरो, दुःस्थो गच्छति यत्र याति तदनुच्छायेव शीघ्रं विपत् २५

कश्चिन्निःस्वः खल्वाटो निदाघकाले निर्वासा भानुभानुभिर्भाले संतापितोऽशनायोदन्याभ्यां बाधितो मालूरपादपस्याऽधस्तान्न्यसीदत् । तदनन्तरं शिलेव घनं बिल्वफलमधिललाटमपतत् । अथ चिन्तयामास—काऽधुना व्रजामि ? ललाटन्तपत्रासेन त्रस्तो बिल्वमूलमुपागतस्तत्रात्राऽपि फलपातेन मे शिरो भग्नम् । दैवहतकस्य मे पृष्ठे छायेवानुगच्छंति विपदः ॥ २५ ॥ यतश्चोक्तम्—

खल्वाटो दिवसेश्वरस्य किरणैः सन्तापितो मस्तके, वाञ्छन् देशमनातपं विधिवशाद् बिल्वस्य मूलं गतः।
तस्योच्चैः पतता फलेन महता भग्नं सशब्दं शिरः, प्रायो गच्छति यत्र भाग्यरहितस्तत्रापदां राशयः ॥ १ ॥

भाग्यवतः प्राणिनः स्वेष्टवस्तुनः प्राप्तिर्भवत्येव तत्राऽहेः २५-कथानकम्—

क्षिप्तः केन करंडकेऽपि भुजगः क्षुत्पीडितोऽनाशको, रात्रौ खादिमकांक्षयाऽऽशु विवरं कृत्वोंदुरुस्तन्मुखे ।
भाग्यादेव तदा स्वयं निपतितस्तन्मांसतृप्तोऽभवत्, यातस्तेन पथा नृणां स्थिरतरं भोगीव भाग्यं भवेत् ॥२६॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कश्चिद्गारुडिकः फणिनमेकं निगृह्य करंडके न्यधात्। तस्मिंश्च क्षुद्बाधितस्तृषार्तश्च जीवने हताशः सन्नास्त। तस्मिन्नेव क्षणे कश्चिदुन्दुरुरागत्य खाद्यं द्रव्यं विज्ञाय करंडकं भित्त्वा प्राविशत्। प्रविष्ट एव भुजंगो दैववशात् स्वाशनमुपलभ्य तेन सुहित आखुकृतविवरेणैव निष्क्रान्तो यथेच्छं जगाम। अहिरिव व्यसने पतितस्यापि स्थिरनियतेर्नरस्य शातमेव संपद्यते। भाग्यस्थैर्यं नाम धृतिपरिपालनं ॥ २६ ॥ सूक्तं केनापि—

**नो कार्या पुरुषैश्चिन्ता, निगडे पतितैरपि। यद्भाले लिखितं धात्रा, भवेद् भोगीव नापरम् ॥ १ ॥**

**बहुसम्मतिके कार्येऽविचार्योत्तरदानेऽनादरो भवति तत्र २६–दृष्टान्तः—**

**नत्वा पृच्छति कार्षिको निजगुरुं वर्षा न वा वर्षति, क्षेत्रे ते निशि वक्ति सोऽपि न परे लात्वा सशिष्यो घटान्।**
**कूपात्संचाति कं परा हि मनुजाः श्रुत्वेति वार्ता गुरो-स्ते पृच्छन्ति तथा ब्रवीषि वहसि प्राहुर्विनेयास्तदा ॥२७॥**

कश्चित्कृषकः स्वगुरुं प्रणम्य पृच्छति–भगवन्! देवो वर्षिष्यति न वाऽस्मत्क्षेत्रे सर्वमप्युप्तं धान्यं शुष्यति। गुरुरुवाच–भो! अद्य ते केदारे मेघो वर्षिष्यति, परमन्येषां न विजानामि। अथो सशिष्यो गुरुर्यामिन्यां शस्यक्षेत्रे अम्भोजलकलशमापूर्य आरात्रं क्षेत्रं परिषिषेच। ततः क्षेत्रपतिः स्वं केदारं सिक्तं विलोक्य तुष्टोऽभवत्। अमुमुदन्तं परे जनाः समाकर्ण्य गुर्वन्तिकमुपेत्य यथापूर्वं नतिं प्रकल्प्य पप्रच्छुः। तदा गुरुणाऽपि तेभ्यः पूर्ववदेवाऽभिहितम्–तन्निशम्य विनेया अपि गतशर्वरीवाऽद्यापि क्षेत्रसिञ्चनं विधातव्यमिति विज्ञाय गुरुं गदितवन्तस्ते–यो वक्ष्यति स एव विधास्यति। नास्माकं कापि क्षतिः ॥ २७ ॥ पठ्यतेऽपि—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कार्यार्थिनो हि बहवो, गुरून् पृच्छन्ति स्वार्थगाः । ज्ञानहीनैर्न दातव्य–मुत्तरं कोविदैर्यथा ॥ १ ॥
एक वार कहने वहा, हवे न वहसी कोय । गुरु प्रति शिष्यें बोलिया, जे कहसी ते होय ॥ २ ॥

सवित्तोऽपि यो दानं न यच्छेत्तर्हि तद्धनं नश्येत्तत्र भोजनृप–माघबुधयोः २७–कथा–

भोजो वक्ति कवे ! मृदंगसुरवस्यार्थं वदाऽष्टाहि सः, ज्ञातं नान्यजनैः करिष्यसि यदीभारोहणं वच्मि तम् ।
कृत्वेशान्तगतः किमस्त्ययमतोऽर्थं वक्ष्यति त्वावदत्, त्वद्ग्राह्यं ह्युपदेशमीश ! तव भो नो दीयते तद्गतम् ॥ २८ ॥

एकदा मुञ्जो भोजनृपो नृत्यमकारयत्तदानीं मृदंगशब्दमाकर्ण्य भोजराजो माघकविं प्राह–भोः किमसौ ध्वनति ? ततो माघकविरपि तस्योत्तरप्रदानायाऽष्टदिवसावधिं ययाचे। ततः शास्त्राणि विलोकितानि, परं मृदंगशब्दार्थं नावबुध्यत। तदा शोकसंविग्नमानसं माघकविं निभाल्योपागतो विप्रस्तं कृच्छ्रनिदानमप्राक्षीत् । तदनु माघः प्रोवाच–विप्रवर ! मृदंगशब्देन कोऽर्थः प्रतिपाद्यते । तदा स कोविदं वक्ति यत्त्वं मां करिणमारोह्य नरपतिसविधं प्रापयेस्तर्हि मृदंगशब्दार्थं भूपालं बोधयेऽहम् । पश्चाद् दन्तावलपृष्ठमारोह्य नृपान्तिकमानिन्ये । तं द्विजं गजाऽऽसीनं विलोक्य भोजः प्राह–कोऽयं ? तदा माघो बभाण यदसौ ना भवन्तं मृदंगरवार्थं प्रत्याययिष्यति । तद्वचनमुररीकृत्य भूनाथेनानुयुक्तो बुधोऽवादीत्–उर्वीपते ! धमधमेति ध्वनिं कुर्वाणो मृदंगो भवन्तमुपदिशति–यो हि प्राज्यं राज्यमासाद्य द्रविणन्तु दूरमास्तां परं कपर्दिकामपि न प्रयच्छति तद्वित्तमभूतोपममेवेति निश्चितं जानीहि । मामेव वीक्षस्व, कस्मैचिद्विप्राय जीर्णपादत्राणस्य विहापितेन नागारूढः समभवम् ॥ २८ ॥ तस्यैतत्फलम्—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपानहौ मया दत्ते, जीर्णे कर्णविवर्जिते । तत्पुण्येन गजारूढ–स्तद्गतं यन्न दीयते ।। १ ।।

अथ मायाविषु मायिभिर्भवितव्यं तत्र २८–कथा—

पर्षद्यन्यकविः करोत्यभिनवं भोजस्य काव्यं तदा, श्रुत्वाहुश्च पुरातनं कविजना भूयोऽपि किं तेऽपठन् ।
राज्ञा तैश्च तिरस्कृतः प्रतिदिनं वादोऽभवच्चैकदा, कृत्वा वेधयुतं स्थिता विमनसो लक्षं च लात्वा गतः।।२९।।

कदाचिद् भोजराजस्य परिषदि कोऽपि नव्यः कोविदः समाययौ । स प्रत्यहं भोजराजं नृपं श्लोकैरुपश्लोक्याऽऽशीर्वचोभिरैधिषत् । परं तन्निर्मितपद्यानि कल्मषधिया संसदि निषण्णाः कालिदासादयः कवयः प्रतिघस्रं प्रत्याख्याय क्षिपन्ति स्म । अथ च महीपतिमुक्तवन्तः—राजन् ! कवेरस्य कृतिः पूर्वकविकल्पितैव, एतत्काव्यं त्वस्माभिरपि प्रागेव स्मृतिविषयतां नीतम् । तदा धाराधिपेन भोजेन पृष्टास्ते श्रुतधराः कालिदासादयः कवयः कण्ठतः समुदाजह्रुः । तदानीं नृपः सुकविमवमत्य बहिश्चकार, एवं नित्यं वाक्कलहः प्रावर्तत । ततः पण्डितोऽपि स्वापमानेनाऽन्तर्दग्धो वेधयुक्तं काव्यं चक्रे । स्वकाव्योच्चारणेऽक्षमांस्तान् कालिदासादिकवीन् क्षीणप्रभान् कृत्वा नृपतिसकाशाल्लक्षं द्रव्यं जग्राह ।। २९ ।। तत्कवेः सैषा कविता—

भोज! त्व राजराजः क्षितिपातितिलको धार्मिकः सत्यवादी, पित्रा ते या गृहीता नवनवतियुता हेमकोट्यो मदीयाः।
त्वं ता देहि त्वदीयैः सकलबुधजनैर्ज्ञायते सत्यमेतत् , नो जानन्ति त्वदीयाः सकलबुधजना देहि लक्षं तथापि।।१।।

तदर्थः—भो भोजनृपते ! त्वं राज्ञां मध्ये स्थासक इव, धर्मिष्ठः सत्यवक्ता चाथ निजान्वयस्य सुषमाकरोऽसि, परं तव तातेन

या मे नवकोट्यो दीनारा गृहीतास्तांस्त्वं प्रयच्छ । तदुदन्तं ते परिषत्प्राज्ञा अशेषतो विदन्ति, यदि चेमां वार्ता तत्र विद्वांसो नो जानन्ति, तथापि लक्षं द्रव्यं देहि । अयमत्राभिसंधिः–यदि चायं पुराणः श्लोकस्तर्हि नवनवतिकोटिसौवर्णान् देहि । ऐदानिकः स्यात्तथापि लक्षं देहि ॥ १ ॥

अथाऽत्र भवेऽदत्तमृणं परभवेऽपि दानं विना न मुच्यते तत्र २९–दृष्टान्तः–

भोजर्णं हि विधाय पारभविकं तैल्यालये च स्थितो, वृत्तान्तं प्रतिकर्ण्य स त्वनडुहोर्दृष्ट्वा प्रभातेऽखिलम् ।
गत्वा भोजगृहं समर्प्य सकलं भाण्डारिकानां धनं, तान्प्रोचे तदृणं क्षमोऽन्यभाविकं दातुं न गेहे गतः ॥३०॥

कश्चिदर्थश्चिन्तयामास, यदस्मिन्भवे रातं लातं वा परत्राऽऽदेयं प्रदेयं च न भविष्यतीति मत्वा तेन भोजभूपालमुपेत्याभिहितं, यदहमग्रे जनने तुभ्यं सकुसीदं लक्षराजतानाप्स्ये । यदि नियोगश्रेष्ठेर्लेखं कृत्वा समर्पयामि, इत्युक्त्वा लेखं विन्यस्य राजकोषागारिकेभ्यो लक्षं वित्तमादाय यामिन्यां तैलिकागारे सुप्तः । तत्र निशीथे तैलिकबलीवर्दौ मिथः समभाषेताम् । तयोरेकश्चष्टे-यदस्माभिः पूर्वभवे गृहीतवित्तमध्यादेकं पणकं देयमस्ति । तदहं चतस्रो भ्रमीः कृत्वा मृत्वा विमोक्ष्ये, परलोके च सुखं प्राप्स्ये । तदैवापर ऊचे–धन्योऽसि त्वम्, मया तु तैलिकस्याद्यापि लक्षमुद्राः प्रदेयाः सन्ति । अथ च राजा भोजो मे पूर्वजन्मनोऽधमर्णः । निद्रित एष वणिक् प्रगे भोजराजान्तिकं गत्वा गदेत् । यत्तव वारणमुख्येन साकमस्य तैलिकवृषभस्य प्रतियुद्धं भवेत् । यदि वृषो जयेत्तर्हि त्वयास्मै लक्षरूप्यकाणि देयानि । एवं समयं कृत्वा गजमुख्येन सह मां प्रतियोधयेत्तर्हि जित्वा तं तैलिकलक्षराजतान् प्रदायाऽनृणो भूत्वा प्रेत्य चेतः शर्मभाजनो भवामि । इमां वार्तां श्रुत्वा स वणिक् प्रभाते प्रबुध्य पणकाधमर्णस्यानडुहो गदितमुदन्तं



For Private and Personal Use Only

यथातथमपश्यत् । तदानीं मनसि विचारयामास—प्राप्ते जनने गृहीतं स्वं देयमेवेति मतं सम्यग् निर्णीय मनसि निकषा भोजनृपं प्राप्तो रात्रिवृत्तमामूलतः समचकथत् । अथ चान्यजन्मनि त्वदृणेनाऽऽनृण्योपायं नाऽवलोकयामि । तस्मात्त्वमर्थं प्रत्याहर, अहं तु भृतिकर्मणा स्वजठरं पूरयिष्यामि । एवं निवेद्य समाहूतं स्वं कोषाध्यक्षाय ददौ । पुनश्च करिमुख्येन सह ककुद्मन्तं योधयित्वा तैलिकऋणादनृणं चकार ॥ ३० ॥ उक्तं च दोहा—

इह भव देणुं दोहिलुं, परभव वली विशेष । बलद कथाने सांभली, तजियें ऋणो अशेष ॥ १ ॥

गाथा-दासत्तं देइ ऋणं, अचिरा मरणं पुणो वि संपण्णे । सव्वस्स दाह मग्गी, दिंति कसाया भवमणंतं ॥२॥

अथ पांशुला जीवदानादपि स्वीया नैव भवति तत्र ३०—दृष्टान्तः—

प्रीत्या तेऽपि सह त्वयाऽद्य निधने धक्ष्यामि संकेतकृत्, तत्सर्वं रचितं सुरैर्यदि तदाऽर्धायुश्च दत्तं स्त्रियै ।
मुक्त्वा सापि तमन्यपत्तनगता तस्मिन् पुरेऽसौ गत—स्तद्भार्या मिलिता तदा च कुटिला स्वार्थं विनाऽनर्थकृत् ॥३१॥

कश्चिन्मनुजः प्रेम्णा निजजायया सार्धं मिथो भाषमाणः समयमकार्षीत् । यत्तव निधनं मत्तः पूर्वं चेत् ज्वलने त्वामहमनुसरिष्यामि । तत्पश्चाद् भार्ययाऽप्यभाणि—यदहमपि त्वद्वते वह्नावात्मानं होष्यामि, इत्थं परस्परं निश्चिक्याते । तदखिलमुदन्तजातं कश्चिद्देवः समश्रुत, ततः स देवः स्त्रियं गतासुमकरोत् । तदानीं स पुरुषः समित्समिद्धे ज्वलने प्राणान् होतुमुद्यतः, तस्मिन्नेव क्षणे देवः प्रभूतं वर्षित्वा वह्निं निरवाप्सीत् । तदनन्तरमक्षतस्य पुरुषस्य स्त्रिया आयुषोऽर्द्धभागं ददौ । अथ तत्पत्नी स्वभर्तारं विसृज्य पारेसमुद्रं विषयान्तरं जगाम । पुरुषोऽपि देशाद्देशं परिभ्रमन् तस्मिन्नेव नगरे निजभार्यां दैवात्प्राप । तदानीं व्रीडयाऽधोमुखी

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बभूव, यतः परित्यज्य स्वामिनं पलायाश्चक्रे । तत्र स्त्रीचरित्रं प्रकटयन्ती स्ववासांसि परिच्छिद्य च पूत्चक्रे-यदयं नरो मम सतीत्वं भ्रंशयति, तन्निशम्य राजपुरुषास्तं निगडे बध्वा शूलमारोहयामासुः। एवं पुंश्चल्या तया स्वार्थमन्तरैवाऽत्याहितमकारि ।३१। उक्तमपि-

बहु करिये उपकार भी, योग न माने जेह। अरधुं दीधुं आउखुं, तेनी थई न तेह ॥ १ ॥

अथ यल्लिखितं ललाटफलके नूनं तदाप्तिर्भवेत्तत्र ३१-कथा-

दारिद्र्यश्चपलान् सदाऽस्ति भगिनी सोऽचिंतयन्मेऽस्ति हि, मिष्टान्नेच्छिकया स्वसुर्गृहगतो भ्रातुश्च हर्षान्विता ।
भुक्त्यर्थं पतिता गृहेऽपि चपलाः स्थाल्यां तदा मुंचति, दत्त्वा स स्थलिके करं वदति तां रात्रौ गता येऽग्रतः॥३२॥

कश्चिद् दुर्गतोऽहर्दिवं चपलान् खादति स्म। एकदा चपलानश्नतस्तस्य छर्दिरभवत्, तदा सोऽचिन्तयत्-अहो! कष्टमापन्नोऽस्मि। पश्चान्मिष्टान्नजिघत्सया प्राघुणिको भूत्वा भगिनीनिकेतनमभ्यगात् । तत्र भ्रातरं वीक्ष्य प्रीता सा भोजयितुं चपलान् रसवत्यां संरराध, भोजनवेलायां च भ्रातुः स्थाल्यां चपलान् परिविवेष । तान् विलोक्य विषण्णो भ्राता भाले पाणिं न्यस्य भगिनीमवादीत्- यन्निशायामेव मदागमनात् प्रागेव चपलास्त्वद्गृहमागमन्निति तर्केऽहम् ॥३२॥ दोहा—

में लीधो छे प्रहसमो, चोले लीधी रात । एथी भागो आवियो, भगिनी ! थोडा लात ॥ १ ॥
देश तजी परदेश भमे, धरे घणी मन आस । सरज्यो ते नर पामियें, चवला पडिया पास ॥ २ ॥

यः पापं विधाय पश्चात्तापं कुर्यात्स सुखी स्यादन्यथा दुःखी तत्र राजसौधे व्रजतोर्ग्रामीणयोः ३२-कथा—



For Private and Personal Use Only

हर्म्यारोहणवारितं नृपतिना भृत्यः कथं कार्यतां ?, वामं गच्छति मुच्यतामिह गतौ ग्राम्यौ तदाऽऽक्रोशितौ ।
वक्त्येकः किमु ? मारितोऽपरनरो भीत्याऽऽशु मां रक्षतु, गत्वाग्रे यदि गम्यतां त्वरगतेर्मुक्तः सुखी सोऽभवत् ॥३३॥

केनाऽपि भूभृता वाटिकाया मध्ये सौधः कारितः स्वनियोज्यांश्च समादिदेश—यत्कोऽप्यस्मिन्भवने न प्रविशेत् । तदा द्वाःस्थैः पृष्टम्—अजानन् कश्चित्प्रविशेत्, किमु तस्य विधेयं ? तदानीं नृपोऽब्रवीत् सोऽपि हन्तव्य एव न तु मोच्यः । तन्निशम्य दौवारकाः सप्रश्रयं निवेदयामासुः—राजन् ! कठोरोऽयं दण्डः । तदनु नृपः समचकथत्—यदि प्रवेशकः प्रतीपपाद एव व्रजेत्तर्हि स हेयः । एकदा प्रस्तावे द्वौ ग्राम्यजनौ विस्मृत्य तत्राऽऽजग्मतुः । तदानीं राजपुरुषैर्निगृहीतयोस्तयोरेको वाचाटो जीवनाशं नष्टोऽपरो भयभ्रान्तो मां त्रायध्वमित्यभाषत । अथ च प्रतीपगमनान्नृपानुचरैर्विसृष्टः स्वबान्धवेषु प्राप्तः सुखमुवास ॥३३॥ उक्तञ्चापि—

पापं कृत्वा पुनः पश्चात्, यो निन्दति नरोत्तमः । स सुखी जायते लोके, यथैको हर्म्यवीक्षकः ॥ १ ॥

अविचार्य मन्दधिषणे विश्वासवाक् न देया तत्र ३३—कथानकम्—

भूपाऽऽभीरिसुते सदाभिरमतो रोदित्यभीरांगजा, वक्त्याः ! रोदिषि किं ? भवद्विरहतः सत्यं धवैको हि नौ ।
याम्यागच्छसि विट्समं निशि सखे मार्गे मिलित्वा गता, श्रुत्वार्याश्चलहेतुकां वरमतो ज्ञात्वा गता स्वालये ॥३४॥

एका राजकन्याऽपराऽऽभीरकन्या चोभे सख्यावास्ताम्, मिथः संगते चिक्रीडतुः । एकदा बाष्पं विमुंचती साऽऽभीरबाला नृपकन्यया पृष्टा—किन्निमित्तं रोदिषि ? अथैनां सा बभाण—राजसद्मनि परिणीता बहिर्निष्क्रमितुमक्षमा सती त्वं मया सह नोपस्थास्यसे, तत्त्वद्वियोगपीडिता रोदिमि । तदानीं राजदुहिताऽपि तस्यै यो हि त्वद्भर्ता ममापि स एव, इत्थं वचनं ददौ । जात्वाभीर-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बालिका केनाऽपि भुजंगेन साकं गन्तुं प्रवृत्ता, तत्क्षणे तया महीपसुताऽत्रादि—त्वमनेन सत्रा व्रज। पश्चात्सा प्रथमोदितवचनबाधिता तेन सह नगरान्निश्चक्राम। अग्रे गच्छतां तेषां घटीयंत्रचालकः समनुप्राप्तस्तदाऽस्यादाम्रदृष्टान्तं निशम्य सुज्ञाना भूपकुमारी स्वनिकेतनाय निववृते ॥३४॥

दोहा—कालुं वांकूं मुह करी, रत्तड़ा थयो अशास। तें फल दीधे कवण गुण?, जो फल दिये पलाश ॥ १ ॥
सुरतरु जाणी सेविआ, तूं तो निगुण पलाश। जब तें मुख कालो कियो, तब मैं छोड़ी आश ॥ २ ॥

अथ महतामनुकारी नीचोऽवसीदति तत्र ३४—दृष्टान्तः—

काऽरण्येऽग्निभयाद्ध्रदे पतति वै सिंहादिजन्तुव्रजः, शान्ते वह्निभये हरिर्वदति तान् पुच्छं गृहाणाऽऽशु मे। ते गृह्णन्ति तदा हृताः स्थलचरास्तद्धारितं फेरुणा, पश्चात्तेन कृतं तथापि न हृताः पुच्छं तदा त्रोटितम् ॥३५॥

कस्मिंश्चिद् गहनमध्ये वह्निभयात्प्रद्रवन्तः केसरिप्रभृतयः प्राणिनोऽगाधे सरसि निपेतुः। पश्चाद्दवाग्नौ शान्ते कण्ठीरवो मृगादीन् व्याजहार—भोः सत्त्वाः! यूयं मम बालधिं गृह्णीत, सर्वानप्यहं तारयिष्यामि। तदाकर्ण्य समेऽपि तल्लाङ्गूलमगृह्णन्नथ मृगेन्द्र आप्लुत्याखिलान् बहिश्चकार। सा वार्ता केनाऽपि क्रोष्ट्रा हृदि निहिता, पुनः कतिपयैरेवाहोभिर्दावसाध्वसान्नीररये भ्रष्टान् जन्तून् सिंह इव जम्बूकोऽवदत्—मे पुच्छमादत्त, युष्मान्निष्कासयिष्येऽहं। अथ बलमाधाय यावदुत्पतति, तावदेवास्य पुच्छं भग्नम्, जन्तवश्च सर्वे मृताः। यतोऽधमो जनः स्वाधिकवीर्यमनुकुर्वन् क्लिश्नात्येव ॥ ३५ ॥ तथा चोक्तम्—



For Private and Personal Use Only

आत्मवीर्यं न जानाति, दृष्ट्वा दृष्ट्वा करोति यः । स दुःखी स्याद्यथा फेरु-स्त्रुट्यत्पुच्छो ह्यधोऽपतत् ॥ १ ॥

अथ महतां छायापि सत्फलदा तत्राऽजापालस्य ३५-सूपनयः—

च्युत्वाऽधो न्यपतन्फलानि स ततो दृष्ट्वा तदाचिंतयद्, गोपो मूर्ध्नि हि खेगमस्य पतिता छाया वरा बुद्धिदा ।
श्लोकस्तेन कृतश्च पादरहितश्छाया गता नो पदं, तादृक् तेन हि पूरितं निजधिया डुब्कं च डुब्कं पदम् ॥ ३६ ॥

एकस्मिन्नन्धुमध्ये जंबुफलानि पतंति स्म, तानि दृष्ट्वा कश्चिच्छागपालो व्यचिन्तयत्—यदिमानि फलानि खाद्यानि । तस्मिन्नवसरेऽजापालस्य भालोपरि सरस्वतीविमानस्य छाया पपात । तदानीमजापालस्य बुद्धिरुत्पन्ना, तया श्लोकस्य पादत्रयं तेन रचितं परं तत्क्षण एवाऽपगता विमानच्छाया । ततः सहजधिया तेन चतुर्थश्चरण इत्थं निर्मितस्तन्निर्मितं पद्यमीदृक्-॥ ३६ ॥

जम्बूफलानि पक्वानि, पतन्ति विमले जले । पतितान्येव दृश्यन्ते, चतुर्थन्तु डुबक् डुबक् ॥ १ ॥
छायापि फलदा पुंसां, महतान्तु विशेषतः । विमानच्छायया वाण्या, गोपोऽपि पटुतां गतः ॥ २ ॥

अथ सद्विद्या सर्वेषां विस्मयकरी भवति तत्र ३६-कथा-

कोप्यागत्य विशारदो वदति मे विद्यां नृपं पश्य भोः!, स्त्रीं मुक्त्वेशगृहे गतो हि गगने मृत्वाऽपतत्तत्समम् ।
सा दग्धा पुनरागतो मम वधूं त्वं देहि वार्ताऽपि सः, कूटं मा वद चानयामि हि वरं लात्वा गतो विस्मितः ॥३७॥

कश्चिद् विप्रः स्वस्त्रियमादाय कस्याऽपि भूभृतो भवनमाससाद । अब्रवीच-मम विद्यावैभवं पश्य, नृपोऽपि वरं प्रदर्शयेत्यु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च्चिवान् । तदनन्तरमन्तःपुरे निजभार्यां विसृज्य गगने च देवासुरसंग्रामो जायते, तत्राहं प्रयामीत्युक्त्वा गतः । संख्ये हतः कर-चरणाद्यवयवैः सहितो भुवि न्यपतत् । तं विलोक्य तत्सीमन्तिनी समिद्धेऽग्नौ तेन सहैवात्मानं जुहाव । तत्कालमेव सोऽपि पुरुष ऐन्द्रजालिकवद् भूपसमीपमागत्य जगाद—भोः पृथ्वीश ! प्रयच्छ मे दारान् । नरपतिरपि याथातथ्येन सर्वमुदन्तजातमामूल-चूलतो न्यवेदयत् । परं सोऽपि तदुदितं मृषा मन्वानो बभाण—मम भार्या त्वद्गेह एवास्ति । अथैनं नृपोऽप्यभाषत—मद्धर्म्ये तव पत्नी चेत्समानय, इत्युक्तः सोऽपि निजपत्नीमानयत् । तद्विद्यायाः प्रभावं विलोक्य सदसि निषण्णाः सर्वेऽपि विस्मयमापुः पुनः प्रभूतद्रव्यदानेन तं प्रसादयामासुः ॥ ३७ ॥ कथितमपि—

विप्रेण दर्शिता विद्या, विक्रमः सदसि स्थितः । तमीक्ष्य सुभटाः सर्वे, तदा तस्मै धनं ददुः ॥ १ ॥

अथ कपटेन कुलटा मृतिमाप्नोति तत्र ३७–कथा—

नो पुष्णाति पतिं तमाह कुलटा मेऽन्धं कुरु त्वं सुर !, श्रुत्वेतो हविषा ततो हि हविषा पीनस्तदान्धोऽभवत् ।
पश्चात्पोषमुपागतो वदति स पश्यामि नो निर्भया, भुंक्तेऽन्यैः सह भोगमस्ति बलवान् युग्मं गृहीत्वा हतम् ॥३८॥

कापि कुलटा कामिनी स्वपतिं न पुष्णाति, स्वयं च स्वैरिणीति स्वधवेऽनुरागं नाऽऽहितवती परस्मिंश्चारज्यत । एकदा सा यक्षमर्चयित्वा पूजावसाने तं प्रार्थितवती—भो यक्ष ! मे भर्ता चक्षुर्विकलो भवेदिति । एवमतिक्रामति काले तद्धवोऽपि तां वार्तां श्रुतवान्, तदा कपटवेषेण यक्षप्रतिमायाः पृष्ठदेशे निलीय स्थितः । अथ तत्स्त्री यक्षप्रतिमासमीपमागत्य यावत्प्रार्थयते—भो यक्ष ! मम पतिं नेत्रहीनं कुरु तावत्पृष्ठभागे समुपविष्टः पुरुषः प्राह—हे अबले ! यदि त्वमन्वहं स्वभर्तारं मिष्टमिश्रान् घृतपूरानपूपादीन्-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वनवान्धोनिर्मितान् पदार्थानाशयिष्यसि, तर्ह्यविलम्बेनैव सोऽन्धः संपत्स्यते । तन्निशम्य सा तथैवोपाचरत् । तस्याः प्राणेशोऽपि हतलोचन इव प्रणिगदति–अये सुन्दरि ! मे दृष्टौ किमपि नाऽऽपतति, किमहमधुना करवाणि, देहि मेऽवलम्बनमिति । तदानीं सा पुंश्चली निर्विशंका विटेन सह रममाणा रतिजनितसुखमन्वभूत् । तस्या हृदि शंकागन्धोऽपि नाऽऽस्पदं चकार । यदा स सद्यो निर्मिताज्यबहुलभोज्यद्रव्यैः पिनद्धगात्रः समजायत, तदा व्यभिचाररतं युगलं संनह्य यमसदनातिथिमकरोत् ॥ ३८ ॥

उक्तञ्च–कथं हससि भो हंस !, नाहं दर्दुरवाहनः । कालक्षेपं करिष्यामि, घृतान्धो ब्राह्मणो यथा ॥ १ ॥

अथ गुरुः शिष्यान् परीक्ष्य निजास्पदे स्थापयेत्तत्र ३८–कथा—

शिष्यान् वक्ति गुरुस्तदाम्रफलमिच्छाम्यानय त्वं पृथक्, पारीक्षाय निवेदिताः प्रथमकोऽवग् वृद्धता ते गुरो ! ।
अन्यो गच्छति शब्दितस्त्वयलघुर्गत्वा विधिं पृच्छति, त्रैविध्यं ज्ञविनीतकं हि गुरुणा ज्ञात्वाऽर्पितं सत्पदम् ॥ ३९

अथ कोऽपि गुरुः स्वपदे कमपि शिष्यं नियोजयितुं प्रशस्यशिष्यपरीक्षणाय प्रथमं तेषु वयसा ज्येष्ठं प्रत्याह–यत्त्वमस्मभ्यमाम्रफलमाहृत्य प्रयच्छ तदा सोऽवक्–हे गुरो ! ते मतिः क्व विलीय गता, यद् वार्धक्येऽपि रसालफलमुपभोक्तुं मनः प्रसरति । पश्चादपरं शिष्यं प्रत्याह–भोस्त्वमाम्रफलमानय । अथ सोऽप्यानेतुं प्रस्थितः, पश्चात्तमाजुहाव । पुनरित्थमेव तृतीयं कनीयांसं प्रत्यवदत् । स त्वभिवाद्य गुरुं पप्रच्छ–कृपालो गुरो ! त्रैविध्यमाम्राणां कतममहमानयानि ? । इत्थं तस्य वाक्पाटवं प्रसमीक्ष्य ज्ञानवन्तं क्रियावन्तं विनयाश्रितञ्च तं शिष्यं स्वस्थाने स्वपट्टे वा संन्यवेशयत ॥ ३९ ॥ तथा चोक्तम्––

परीक्षा सर्वसाधूनां, शिष्याणां च विशेषतः । कर्तव्या सूरिणा नित्यं, त्रयाणां हि कृता यथा ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निर्गुणस्त्रीभिर्गृहलघुता भवति तत्र सचिववधूनां ३९-दृष्टान्तः—

लोलामात्यवशाश्चतुर्मुखसमाः श्रुत्वा नृपस्तद्गृहे, गत्वा पश्यति ताः पतिर्वदति भो ! मौनं विधेयं तदा ।
तद्भोज्ये नृपवर्णिताः सुवटिकास्तिस्रो गिरोचुः स्वतः, दृग्भ्यां क्रोशाति तूर्यका स हसितः सोचे मया किं कृतम् ४०

कस्यापि भूभृतः सचिवस्य चतस्रो योषितः स्खलितवाच आसन्, तदुदन्तमाकर्ण्य राजाऽपि चिन्तयामास-यदेष उदन्वो वितथोऽवितथो वेति मार्गणीयं मयेति संप्रधार्य, एकदावसरमाप्य मन्त्रिणमुपहास्येनोवाच-सचिव ! कदाप्यद्यावधि त्वयैकवारमहं स्वालये न भोजितोऽत एकशस्त्वद्गृहे भोक्तुमिच्छामीति महादरात्सचिवेन निमन्त्रितो राजा स्वमंत्रिणो गृहं जगाम। तदानीं सचिवेन स्वीयाश्चत्वारो दाराः संबोधिताः, युष्माभिस्तूर्ष्णीभूयाऽवस्थातव्यमिति, तदुदीरितं ताभिरुररीकृतम् । पश्चाद्राजानमाशयितुं वटकशाकं पर्यवेषयत् । अथ नृपो यदाऽत्तुमतिष्ठत्तदा स्त्रियो हासयितुमवनिपेन प्रोक्तं-वटकाः स्वादुतमाः सम्पन्नाः । एतावदुक्तं निशम्यैका भार्या स्ववाचं नियन्तुं न शशाक। तदाऽविलंबितमब्रवीत्-" ए वडियाँ तो मैं तलियाँ " एता वटिका मया तलिताः । ततोऽपराऽभाषत-" ए वडियाँ तो ते तलियां जो मांइ आइंयां तेलाइ पइयां " एते वटकास्तु त्वया तदा तलिता यदाहमागत्य तैलमददाम् । तदनु तृतीयाऽवदत्-" आहियां डींगड इआं " मयैषु हिंगु निक्षिप्तम्, एवं श्रुत्वा भूपालो जहास । तदानीं चक्षुषी विस्फार्य तुरीयां प्रत्यवालुलोके सचिवः । साऽप्युवाच-" मइ माए बोयां नहीं, चायाँ नहीं, डोयां शुं काढ़िया वो " हे स्वामिन् ! मयात्र कापि चोक्तिः प्रत्युक्तिर्न कृता, पुनः कथं भवता नेत्रे विस्फार्येते ? ॥ ४० ॥ भणितमपि—

गुणहीनाः सुरूपाश्च, भवन्ति गृहभण्डनाः। स्त्रियोऽपि सद्गृहस्थानां, वटिकापाचिका यथा ॥ १ ॥



For Private and Personal Use Only

भद्रजनः सर्वत्र भद्रतामेव लभते, तत्र ४०-कथा-

यज्ञे जग्धिकरीं निरीक्ष्य हरिकेश्यन्नं तदा याचते, तस्मै ते न ददुः सकृद् विषधरं दृष्ट्वा हतस्तैर्नरैः ।
द्वाःस्थान्ते हि तथाऽवदन्त्वविषकैषाऽस्तोऽपि नो मार्यतां,ज्ञात्वा स्वावगुणं ललौ व्रतवरं प्रोक्ता नु तेनाऽऽर्यका॥४१॥

कस्मिंश्चिदध्वरे बहवो भूमिदेवा निमन्त्रिता भुञ्जते स्म । तत्र हरिकेशीनामा श्वपचो भक्तं ययाचे । परं ते तस्मै न ददुः, प्रत्युत चुक्रुशुस्तदनन्तर एव बिलादेको भुजंगो निरियाय । तं वीक्ष्य विप्रा जघ्नुर्हरिकेशी चाण्डालोऽपि तदपश्यत् । अथो कतिपयैरेव क्षणैस्तत्रैका गोधा निस्ससार तां दृष्ट्वा हरिकेशी हन्तुं प्रधावितः । तदा तत्रोपविष्टा भूसुरा व्याजह्रुः-अङ्ग ! अवध्यैषा निर्विषत्वात्तदा स स्वयमेव स्वापराधं परिज्ञाय जातिस्मरणोदयाच्चारित्रव्रतं जग्राह ॥ ४१ ॥ अथ च गाथामुवार्योपदिदेश । सैषा गाथा-भद्देण होइ सव्वं, भद्दं पावेइ सव्वओ भद्दं । हणिओ कण्हो सप्पो, भेरंडो तत्थ मुंच दिट्ठो ॥१॥

सत्प्राणिनो वस्तुवैलक्षण्यं निरीक्ष्य विरज्यन्ते तत्र ४१--उदाहरणम्--

दृष्ट्वेशोऽप्यति सुन्दरं च वृषभं सोऽटाट्यते चैकदा, मार्गे सत्करकण्डुराह निजकान् कस्याऽयमुक्षा तदा ।
प्रोचुस्ते तव भोः ! कमिष्टवृषभं श्रुत्वेति दीनोऽपि सन्, वैराग्यं हि विधाय राज्यमखिलं त्यक्त्वा मुनीशोऽभवत्४२

कस्यचित्करकंडुराजस्य कमनीय उक्षाऽऽसीत् । बहुकालानन्तरमेकस्मिन् दिवसे मार्गमध्य उच्चैराक्रन्दन्तं तं दृष्ट्वा स मनुजानपृच्छत्-कस्याऽयं बलीवर्द इति ? कश्चिदप्येनं न बध्नाति ? तत्र स्थितः कश्चिन्मानवो वक्ति-राजन् ! भवतां निकाममभिमत एष वृषः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवानेव न त्रायते तदा कोऽन्यः परिपालयेत् ? श्रुत्वैतां प्रवृत्तिं राज्ञश्चित्ते निर्वेदवैराग्यमुदपादि । तेन प्रभूतं राज्यं पुत्रकलत्रादिकं च परिहाय दीक्षां ललौ । कृतान्तदन्तान्तरवर्तिजीविते हताशो वृषभ इव क्षणभंगुरं वस्तुजातं परिज्ञाय, संसाराऽसारतां चोपपत्तिभिर्दृढीकृत्य, मोहः खलु पापीयानिति हृदि संप्रधार्य मुनिसत्तमः समजायत ॥ ४२ ॥ कथिता गाथापि—

सेयं सुजायं सुविभत्तसिंगं, जो पासिया वसहं गोट्ठमज्झे ।
रिद्धिं अरिद्धिं समुपेहियाणं, कलिंगराया विसमिक्ख धम्मं ॥ १ ॥

एकाकी सदा सुखी भवति, तत्र नमे राज्ञः ४२–कथा–

नम्यंगं तुदति ज्वरोऽपि ललना घर्षन्ति ताश्चन्दनं, शब्दं नो वलयोद्भवं सहति स त्यक्त्वा समं रक्षितम् ।
पृष्टस्तेन कथं रवो भवति नो ? ताः प्रोचुरेकैककः, चिन्तन्नो बहुतः सुखं मम तदैकाक्यस्ति जातो मुनिः ॥४३॥

एकदा नमिनृपाऽङ्गे दाहज्वरः समुत्पन्नस्तदा सर्वाः स्त्रियश्चन्दनं निघृष्य २ लेपं चक्रुः, परं स शान्तिं न प्राप, चन्दनं निघर्षन्त्यः श्रान्तास्ता वलयानां शिञ्जितेन दुर्मनायमानं तं तोषयितुं मंगलप्रयोजनमेकैककं वलयं करे धृतवत्यः शेषान् सर्वान् निश्चक्रुः । ततो भूषणरवे शान्ते राजाऽप्राक्षीच्छब्दः कस्मान्न जायते ? तदा योषितः प्रोचुः मांगलिक एकैको वलयः पाणौ न्यस्तोऽतोऽजनि ध्वनिविरहः । अमुमुदन्तं निशम्य नृपश्चिन्तयामास–यथैकाकिनो यावत्सुखं जायते, तावज्जनवर्गे नास्ति । यदि ज्वरः शाम्येत्तर्हि दीक्षितो भूत्वा केवलो विचरामि । एवं धर्ममनुध्यायतस्तस्य तापे शान्ते तत्कालमेव प्रव्रज्यां गृहीत्वा स वने पत्तने च विचरन् मुक्तोऽभवत् ॥४३॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गाथा—बहुयाण सद्दयं सोचा, एगस्स य असद्दयं। वलयाणं नमी राया, निक्खंतो मिहिलाहिवो ।। १ ।।

दोहा—चन्दन घसतां चूड़िनो, श्रवण शब्द न सुहाय। एक रखावी चिंतव्युं, बहु मलियां दुख थाय ।।२।।

राजऋद्धि सब परिहरी, लीधो संयम भार । जब इन्दे परिखा करी, न चल्यो नमी लगार ।।३।।

अथाऽविमृश्यैव परस्यानुकृतौ लब्धस्याऽपि प्रणाशः, तत्र ४३—कथा—

छिन्दन्निःस्वनरस्तरुं किल वने देवेन तद्वारितो—ऽन्नार्थी मार्गयतीह देह्युडदजान् दत्तं वरं गच्छ भोः ! ।

गेहेऽदन्ति जना विलोक्य धनिना पृष्टं कुतस्तानयो, प्रोचे तत्र गतः सितागृहघृतं तस्यास्तु मुक्तः स तम्।४४

कश्चिद्धनः कृशश्च पुरुषोऽरण्ये काष्ठमाहर्तुं गतस्तत्र तरुवरं चिच्छेद । तदुपरि काचिदधिष्ठातृदेवताऽन्तर्हिताऽऽसीत्तयोक्तम्‌ भोः ! मा छिन्धि विटपमेनम् । तदा निःस्वपुरुषोऽवदत्—बुभुक्षितोऽस्मि, प्रयच्छ मेऽभ्यवहर्तुमिति। देव उवाच—भोः ! वरं वृणीष्व, यत्कामयसे तत्ते मनोरथं पूरयिष्ये, ततः स उडदजान् ययाचे। देवेनापि तथाऽस्त्वित्युक्तम्, पश्चात्स गृहमागत्य माषजान् खादितुं प्रारभत । तत्परिवारमपि माषजान् प्रत्यहं भक्षन्तं दृष्ट्वा प्रातिवेश्मिको व्यवहारी पप्रच्छ—यत्त्वं माषजान् सर्वदा कुत आनीय खादसि ? स वराकोऽब्रवीत्—वने वृक्षं छिन्दतो ममोपरि देवस्तुतोष, तत्प्रसादेन प्रतिघस्रं माषजानद्मि । तदाकर्ण्य प्रातिवेश्मिकः कुठारमादाय वने गत्वा पादपं छेत्तुमुद्यतः । तदानीं देवो हस्तं तथा जग्राह येन कथमपि मोचयितुं न शशाक । पश्चाद् गृहे संभूतं घृतं प्रतिवेश्मिने देयमिति प्रतिश्राव्य गृहाय मुमोच, । गृहे समुत्पन्ने घृते शर्करां निपात्य भुंक्ष्वेति स्त्रिया प्रतिबोधितोऽपि देववाण्या बद्धोऽस्तोऽवशो वराको गृहस्थितमपि शर्कराघृतं भक्षितुमसमर्थः ग्रन्थिस्थितमपि जहाविति जानीहि ।।४४।। यतः—

For Private and Personal Use Only

दोहा–ढोकल खातां देखिने, हौंस हुई मनमांय । लेइ कुल्हाड़ो वनगयो, खुर थंभी तस काय ॥ १ ॥
वनिता पतिसुं वीनवे, घणी तें कचपच कीय । ढोकल तो पाम्या नहीं, घरना चूका घीय ॥२॥

सत्पुरुषो हीनगुणं वस्तु पुरो न न्यसेत्तत्र ४४–कथा—

दृष्ट्वाऽनीकममात्यमाह नृपतिः कस्यास्ति शौर्यं बले? ज्ञात्वेभस्य तदा मृगाधिपपदे श्वाऽऽरोपितः स्वामिना ।
बद्धा कृत्रिमका सटा बलमुखे संस्थापितः श्वा शुन–स्तत्रागाद् भवतीति पृष्टचरणाभ्यां सोऽपि नष्टोऽधमः॥४६।

कस्याऽपि भूभृतो विषये तद्रिपुर्बलमादाय देशं लुण्टितुमागात् । तमायान्तं श्रुत्वा भूपो मंत्रिणमपृच्छत्—हे मंत्रिन् ! सैन्ये कस्याधिकं बलं भवति ? तदा सचिवेनोक्तम्–सेनायां करिबलं मुख्यम् । नृपः प्रोवाच–सिंहमेकं कृत्रिमं कृत्वा सैन्यसमक्षं स्थापय । इत्येतच्छ्रुत्वा मंत्रिणा कश्चिदेकः सारमेयः कृत्रिमकेसरादिना सिंहीकृत्य भयंकराकृतिः सेनायाः पुरः समानीतः। स शत्रुनृपस्य बलमुखे नूतनजलधरवन्नीलां गजघटां प्रेक्ष्य भषन् पराङ्मुखः सन् पलायांचक्रे। यथा २ सैन्यमभ्यागच्छति, तथा २ कुक्कुरः पृष्ठे पदानि निदधौ । तस्मात्स्वेष्टेच्छुको भद्रपुरुषः कस्याप्यनुकरणं न कुर्यात् ॥ ४५ ॥ तथा चोक्तमपि—

आबद्धकृत्रिमछटा विकटास्यभक्ति–रारोप्यते मृगपतेः पदवीं यदि श्वा ।
मत्तेभकुंभतटपाटनलंपटस्य, नादं करिष्यति कथं हरिणाधिपस्य ॥ १ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ च्छिन्नाऽऽपुच्छखरीप्रहेलिकायाः ४५-कथा—

भूपः प्राह ददामि यो मम सुताप्रश्नोत्तरं दास्यति, राज्यार्धं तनयां च तस्य यदि नो शूलिं च दत्तावुभौ ।
दृष्टैकेन कृता प्रहेलिकवरा मेऽर्थं कुरु त्वं प्रिये !, प्रोक्त्वा बंडखरीं विवाह्य नृपजां राज्यं च लात्वा गतः ॥४६॥

कश्चिद्राजा मनुष्यान्प्रत्युवाच—यो मम सुतायाः प्रश्नोत्तरं प्रदास्यति तस्मै राज्यार्धं स्वां दुहितरं च दास्ये । अथ च वादं कुर्वन् कश्चिदुत्तरं न प्रयच्छेत्तर्हि शूलमारोपयामीति प्रतिश्रुतम् । अनेन पणबन्धेन स पुरुषयुगलं शूलमारोपयामास । अत्रान्तरे कोऽपि राजन्यः स्वस्त्रिया द्विरागमनं कृत्वाऽऽगमत्, मध्येमार्गं च शूलमारोप्यमाणौ द्वौ पुरुषौ विलोक्य प्रहेलिकामेकां च समीक्ष्य स्वयं कुमार्याः पुरो गतो विचिन्त्य च राजपुत्रीं वक्तुं प्रचक्रमे—हे राजसुते ! तव प्रहेलिकायास्त्वर्थो बंडखरीति वर्तते । परमस्मदीयां प्रहेलिकामपि विशदीकुरुष्वेति वाक्यविन्यासेन भूपालः समबुद्धः, यदनेनास्मत्प्रहेलिका प्रतिपादितेति मत्वा स्वतनयां राज्यार्द्धञ्चाऽदित । सोऽप्युभे भार्ये राज्यं च लात्वा प्रस्थितः ॥ ४६ ॥ अथेदानीं नृपदुहितृपृष्टां प्रहेलिकां प्रकटयति—

छुतो तिवारे खाजे नहीं, न छुतो तिवारे खाजे । ए हरियालीनो अर्थ कहे, तेहने कुमरी छाजे ॥ १ ॥

करी करम तो एक तेम बीजी, करी करम तो छे तेम त्रीजी ।
राणी कंकण शीतल थासे, कइक रंक पर कागडा वासे ॥ २ ॥

आँख माहिं पांख विआई, शूली दीधुं पाणी । एहनो अर्थ बांडी गधेडी, तेहने कहे ते राणी ॥ ३ ॥



For Private and Personal Use Only

अथ बुद्ध्या शशकेन सिंहः कूपे निपातितस्तत्र ४६-कथा—

जीवान् हंति हरिस्तदा वनचराः प्रोचुः किमर्थं हरे !, प्रत्येकोऽप्यपरे क्रमं हि शशको घस्रे विलम्बागतः ।
पृष्टोऽवग् लघु नो ? वने तव रिपुर्भो ! दर्शयाऽऽहन्मि तं, कूपे स्वं प्रतिबिम्बमीक्ष्य पतितस्तेनाशु बुद्ध्या हतः ४७

कस्मिंश्चिद् वने सिंहो बहून् प्राणिनो हन्ति, तद् दृष्ट्वा समेऽपि वनचराः ऐकीभूय कंठीरवं प्रत्यूचुः-भो मृगाधिप ! यत्त्वमहरहः प्राणिहिंसां नाकरिष्यश्चेत्तुभ्यं वयं प्रतिघस्रं जीवमेकमदास्याम अथ सिंहोऽपि तद्वचनमंगीचकार । ततस्ते नित्यशोऽनुक्रमेण समभ्यगच्छन् । एकदा कस्याऽपि शशकस्य पर्याय आसीत्, स चिरादागतस्तदा कोपस्फुरितोष्ठः सन् शशकमवादीत् - रे अधम ! कस्माद् विलम्बितेनाऽऽयातोऽसि ? अथ शशकोऽप्यवदत्-हे मृगेन्द्र ! अरण्ये तव रिपुरपरः पंचास्यः समागतः, स मम मार्गमरुन्ध । हरिरब्रवीत्-भोः शशक ! मम शत्रुं दर्शय, तदा केसरिणं वने नीराऽन्धुमध्ये तद्रिपुमदर्शयत् । सिंहोऽपि स्वप्रतिबिम्बं विलोक्य, एष एव मे रिपुरिति मन्वानः कूपे पतितश्च ममार । इत्थं बुद्धिपूर्वककार्यकरणेन लघुकायः शशकोऽपि कण्ठीरवमजीघनत ॥ ४७ ॥ उक्तञ्चाऽपि—

बुद्धिर्यस्य बलं तस्य, निर्बुद्धेश्च कुतो बलम् ? । वने सिंहो मदोन्मत्तः, शशकेन निपातितः ॥ १ ॥

अथ कविकौशलोपरि ४७-कथा—

व्युष्टे याति कविः करेण नृपतिः कूर्चं यदाऽऽकर्षति, केशं तेन करे विलोक्य कथितो निर्भाग्य ! लाह्येककम् ।
सोऽवकिं हि करे ददाति तव मे भाग्यं तदा ज्ञायते, तुष्टः सन् द्रविणं ददौ स कवये कृत्वंशकाव्यं गतः ॥४८॥



For Private and Personal Use Only

एकस्मिन् दिने प्रभाते कश्चिद् बुधो राजपरिषदि स्वं याचितुमभ्यैत् । परमस्य नृपतेः प्रतिज्ञाऽऽसीत्-यदि कोऽप्यर्थी धनं याचितुमुपागच्छेत्तर्हि स्वकूर्चिकोपरि दक्षिणहस्तपरामर्शेन यावन्तः कचाः प्राप्ताः स्युः, तावत एव दीनारान् प्रयच्छेयम्, इत्यस्य कोविदस्य सभामुपगते भूपतिर्हस्ते स्वकूर्चिकाया एक एव केशः संप्राप्तस्तदा राज्ञा कविं प्रत्युक्तम्—भो हतभाग्यशेखर ! गृहाण दीनारमेकमिति । प्राज्ञोऽवक्—कथम् ? महीपतिः प्राह—यतो मम करे कूर्चिकाया एक एव कचः समागतस्तस्मादेकामेव स्वर्णमुद्रामादत्स्व, यदि चास्मादधिकाः स्युस्तर्हि तुभ्यमधिका दद्याम् । तच्छ्रुत्वा कविरचकथत्—

त्वदीया दंष्ट्रिका राजन् !, मदीये चेत्करे भवेत् । तदा भाग्यमभाग्यं वा, ज्ञायेत स्फुटमेव च ।। १ ।।

अर्थात् तव कूर्चिका मम हस्तगता भवेत्तदाऽहं निजभाग्यं विद्यामित्येवं समयप्राप्तं वचनं निशम्य बुधोऽयमिति परिज्ञाय प्रीतः सन् प्रजानाथो विप्रमाहूय दानार्थं संकल्पितुं जलं जग्राह । तत्पयः प्रपश्यन्नेव स भूपतिगुणवर्णनात्मकं काव्यशतं चकार । तदनन्तरं प्रभूतं द्रविणञ्च नीत्वा गतः ॥ ४८ ॥ तत्काव्यानां द्वौ श्लोकौ निदर्शनरूपेण प्रदर्श्येते—

निवसतु तव गेहे निश्चला सिन्धुपुत्री, प्रविशतु भुजदंडे चण्डिका वैरिहन्त्री ।
तव वदनसरोजे भारती भातु नित्यं, न चलतु तव चित्तात्पादपद्मं मुरारेः ।। १ ।।

यो गंगामतरत्तथैव यमुनां यो नर्मदां शर्मदां, का वार्ता सरिदम्बुलंघनविधेर्यश्चार्णवांस्तीर्णवान् ।
सोऽस्माकं सहजाऽऽश्रितोऽपि सहसा दारिद्र्यनामा सखा, त्वद्दानाम्बुसरित्प्रवाहलहरीमग्नश्च संभाव्यते ॥२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथाऽसन्तोषिणः पुरुषस्य ४८—दृष्टान्तः—

द्रंगे कुत्र जटी स्थितः प्रतिगृहस्यात्त्याऽऽशु भिक्षां दिने, पृच्छन्त्यत्र समे जना मम गृहादायाति नो वा तदा ?।
सोऽवग्दुष्टजना वसन्ति सकलाः किं मे गृहान्नागतं, स्वीकारे च महोदरंभरिरयं ज्ञात्वेति निष्कासितः ॥ ४९ ॥

कस्मिंश्चित्पत्तने कोऽपि साधुर्द्रंगे निवसति स्म। एकदा सर्वैरपि संभूय पृष्टः—साधो! कस्यापि गृहाद् भिक्षा समागच्छति न वा? सर्वे लोकाः सौखशायनिकाः सन्ति किम्? तदा तेनोक्तम्—मर्त्या दुष्टमानसा जाताः को भिक्षां दद्यात्? तदा सर्वेऽप्येकैकशः प्रष्टुं प्रारमन्त—भगवन्! मम गेहादायाति न वा? तदा साधुः सर्वानपि ओमित्युवाच। इत्थं भिक्षाप्राप्तिं स्वीकुर्वन्तं तमाद्यूनमिति ज्ञात्वा, सर्वोश्चापशब्दं प्रयुङ्क्त इति निर्णीय तैः स ग्रामाद्बहिश्चक्रे ॥ ४९ ॥ कथितमपि—

दुःखिताः सन्ति संसारे, जीवाः संतोषवर्जिताः। संतोषरहितो मर्त्यो, द्रंगान्निष्कासितो जटी ॥ ॥ १ ॥

अथ भाववंदनोत्कृष्टत्वमधिकृत्य शाम्बकुमारस्य ४९—कथानकम्—

कृष्णो वक्ति सुतौ! ददामि हयमादौ यो जिनं वन्दते, तच्छ्रुत्वा सुतपालको जिनतटे गत्वाऽऽलये शाम्बकः।
अद्याऽऽहाश्वमिमं प्रदेहि मम भोः! पृष्टे जिने नेमिना, द्रव्याद्भावफलं महद्धि हरिणा शाम्बस्य दत्तो हयः ॥५०॥

एकस्मिन्दिने श्रीकृष्णः शाम्बपालकौ सुतौ वक्ति—भोः! यो हि युवयोर्मध्ये श्रीनेमिनाथं प्रथमं गत्वाभिवन्देत तस्मै पट्टवाजिनं ददीय, तच्छ्रुत्वा पालकनामा सुतो रात्रावेव श्रीनेमिनाथं भगवन्तं ववन्दे। शाम्बकुमारस्तु सद्भन्येन विधिना भाववन्दनं चकार।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पश्चात्पालकेनागत्य श्रीकृष्णं प्रत्युक्तं मह्यमर्वन्तं प्रयच्छ, तदा श्रीकृष्णचन्द्रेणोक्तमहं श्रीनेमिनाथं पृष्ट्वाऽऽप्स्ये। ततो गत्वा भगवन्तमपृच्छद्–भगवन् ! पूर्वं भवन्तः केन वन्दितास्तदा भगवतोक्तम्,–द्रव्यवन्दनां पृच्छस्युत भाववन्दनामिति तदानीं श्रीकृष्णः प्राह–यस्या आचरणेन परमश्रेयः प्राप्नुयात् तामेव पृच्छामि। अथ श्रीनेमिनाथेनाभिहितम्–यद् भाववन्दनं गरीयस्तस्मात्पूर्वं शाम्बकुमारेण वन्दितोऽस्मि। इति तद्वचो निशम्य श्रीकृष्णः शाम्बकुमाराय पट्टाश्वं प्रायच्छत् ॥ ५० ॥

पठ्यतेऽपि–भाव एव मनुष्याणां, कारणं सुखदुःखयोः। पृष्ट्वा नेमिश्च कृष्णेन, कृतं यद्वत्स्वपुत्रयोः ॥१॥

अथ भिन्नरुचिर्लोकस्तत्र ५०–कथा—

अश्वस्थं जनकं सुतं विचरतं प्रोचुर्विशोऽधो व्रजा–श्वारूढं कुरु पुत्रकं कृतमतो दृष्ट्वा च पुत्रं तथा।
आरूढौ पथि गच्छतो जडधियौ ताक्ष्यं हि किं मार्यतां, पद्भ्यां दुग्धमयं ददाति तुरगो युष्मभ्यमानीतवान्॥५१॥

कौचित् पितापुत्रौ हयमादाय कंचिद् ग्रामं प्रस्थितौ, मध्येवर्त्म जनकस्तुरङ्गमारूढः सुतश्च पदातिरग्रे व्रजति। तदनन्तरं सर्वेऽपि मेलकाः पान्था ब्रुवते–यदसौ स्वयं घोटकमारुह्य प्रयाति सूनुं पदातिं गमयति, कीदृशो निर्घृणः ? तदनन्तरं तत्पित्राऽभिहितं–भोः पुत्र ! त्वमश्वमधितिष्ठ। पश्चादात्मजमर्वन्तमारूढं समीक्ष्य पथिका अब्रुवन्–हृष्टपुष्टाङ्गः सुतः सैन्धवमधिरुह्य प्रयाति स्थविरो जनकश्चरणौ निघृष्य निघृष्य भुवि गच्छति। तद्वचस्तदाकर्ण्य उभावपि वाहमध्यारुरुहतुस्तदनु पितापुत्रौ तुरङ्गममारूढौ वीक्ष्य प्रेक्षकाः प्राजल्पन्–हन्त ! वराको वाजी हन्यते। तच्छ्रुत्वा द्वावपि पद्भ्यां यातः स्म। अथो दर्शकैर्गदितमहो ! युवां मन्दधिषणशेखरौ स्थः,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यतो युवां पद्भ्यां गच्छथः, महानीतोऽश्वः किं युष्मभ्यं पयो दास्यति ? अत्रोपरितनेन कथानकेन प्रतीयते यल्लोको बहुभाषी, स्वाभाविकं हि जगतां यत्कस्मिंश्चित्कर्मणि दोषदृष्टिर्भवति तथाभूतान् जनाननेकान् कथं संतोषयति सज्जनः ॥५१॥ अतश्चोक्तम्—

सर्वथा स्वहितमाचरणीयं, किं करोति हि जनो बहुजल्पः ?। विद्यते च नहि कश्चिदुपायः, सर्वलोकपरितोषकरो यः १

अथाऽनृताचरणेन नरकवासो नियतो भवति तदुपरि वसुनृपस्य ५१–प्रबन्धः—

तान्संपाठ्य परीक्षणं कविवरः कृत्वा त्रयाणां मृतो, वादं पर्वतनारदौ च वदतौ राज्ञः सभायां गतौ ।
ज्ञात्वा सत्यदृढं वसुं नरपतिं मात्राऽऽग्रहाद्वक्ति तौ, मिश्रं वाक्यमतो गतः स नरके मृत्वा नृपः सप्तमे ॥५२॥

पुरा क्षीरकदम्बकनामोपाध्यायः स्वसुतं, द्वितीयं नारदं, तृतीयं वसुराजञ्चाध्याप्य ममार । पुनर्वसुनामको नृपः पित्र्यं सिंहासनमाचक्राम, नारदश्च विद्याधरोऽभवत्तथा पर्वतोऽपि निजपितुर्व्यासपीठमधितष्ठौ । अथैकदा पर्वतनारदयोर्मध्ये अजशब्दमधिकृत्य वादः समजायत । तत्क्षण उभावपि स्वनिर्णयार्थं सतीर्थ्यस्य वसुनृपतेः परिषदि जग्मतुः, पृष्टवन्तौ चाऽजशब्दार्थम् । तदानीमुपाध्यायान्याऽऽग्रहेण भूपालो मिश्रवचनं जगौ—अजशब्दाभिधेयौ द्वौ, तयोरेकस्तु त्रिवर्षप्राचीनशालिः, द्वितीयस्तु छागोऽजशब्दवाच्यः, इत्थं मिश्रवाक्यव्याहरणेन स महीपतिर्देवैः सिंहासनादधः पातितो मृतश्च सप्तमे नरके गतवान् ॥५२॥ भण्यतेऽपि—

परोपरोधादतिं निंदितं वचो, ब्रुवन्नरो गच्छति नारकीं पुरीम् ।
अनिन्द्यवृत्तोऽपि गुणी नरेश्वरो, वसुर्यथाऽगादिति लोकविश्रुतः ॥ १ ॥



For Private and Personal Use Only

गुणिनि पुरुषे दोषोऽपि निलीयते तत्र ५२–दृष्टान्तः—

जातो माघगृहे सुतो हि हरभे पित्रा सुतः पाठितो, भोजश्रीसदने गतो निशि हरो गृह्णन् धनं जागृतः ।
शय्याऽधो नृपतेः स्थितश्च स तथा काव्यं नृपोऽवक् तदा, ज्ञात्वा गर्वयुतं हि तेन पदतुर्येणेश्वरो बोधितः॥५३॥

माघपण्डितस्य सद्मनि चौरनक्षत्रे पुत्रोऽजायत । तत्पिता चौर्यं महत्पापमिति हेतुमच्छास्त्रवचनं तं पपाठ । परं तत्पुत्रश्चौरभोत्पन्नत्वाच्चौर्याय भोजभूपगृहस्य धनागारे प्रविवेश, द्रविणं चादातुमुद्यतः, परं तदानीमेव कश्चिद् भाण्डागाररक्षको जजागार । पण्डितसुतस्तं वीक्ष्य तत्रैव राज्ञः शय्याधः सुष्वाप । प्रभाते प्रबोधयितुं नृपं चारणा विरुदावलीं जगुः । तदानीं भोजः कवितामेकां कर्तुमारभत, तन्निर्मितानि त्रीणि पदानि श्रुत्वा राजानं गर्वयुतञ्च दृष्ट्वा स चतुर्थं चरणमुवाच । तच्चरणं श्रुतिगोचरीकृत्य राजा प्रतिबोधं प्राप, तस्मै च संतुष्य प्रभूतं धनं ददौ ॥ ५३ ॥ तत्पद्यश्चेत्थम्—

चेतोहरा युवतयः स्वजनोऽनुकूलः, सद्बान्धवाः प्रणयगर्भगिरश्च भृत्याः ।
वल्गन्ति दन्तिनिवहास्तरलास्तुरङ्गाः, सम्मीलने नयनयोर्नहि किंचिदस्ति ॥ १ ॥

अथ स्त्रीवशः पुरुषः किं किं न करोति तत्र ५३–दृष्टान्तः—

प्राज्ञेशप्रमदे मिथो विवदतो वश्योऽस्ति मे वल्लभो–ऽन्योन्यं दर्शयति च्छलेन च पतिः प्रोक्तो प्रिये चेत्कथम् ? ।
जीवेऽश्वोपरि रोहणं यदि तयेशेनापि च स्वीकृतम्, तद्दृष्ट्वाऽपरया पतेः समकचा मुण्डापितास्ते तदा॥५४॥

भोजनृपस्य कालिदासपंडितस्य चोभे भार्ये मिथो धर्मभगिन्यौ बभूवतुः । एकस्मिन्दिवसे द्वे परस्परं गदितुमारेभाते–यद्-

स्मदीयो भर्ता मम वशे वर्तते । तदा पण्डितपत्न्या पृष्टा राज्ञी, कया रीत्या त्वदीयो भर्ता त्वदधीनस्तन्मे पुरो विशदय। तदनन्तरं महिष्याऽभिहितं यथा दिदृक्षसे तथैव दर्शये, तदा कोविदसीमन्तिनी जगाद–यदि त्वं स्वपतिमश्वं परिकल्प्याऽऽरुहेस्तर्हि ते पतिं वशे विद्याम्। तत्काल एव सा व्याजीकृत्य त्रुटिते पर्यंके समासीनोच्चैश्चक्रन्द–हा! हृदयं विदीर्यते प्रियेऽहम् । अस्मिन्नन्तरे क्षितिपतिरभ्यर्णमागत्य पप्रच्छ–कस्मादेवं गर्हितं शयाना क्रन्दसे? अथ राज्ञी जगाद–उदन्तो वक्तुमनर्हः। तदनन्तरं राजाऽत्याग्रहेण तद्वृत्तान्तं प्रष्टुं लग्नः। तदा राज्ञ्युवाच–त्वमश्व इव भूत्वा मामारोहय तत्काले कशाभिः सप्तकृत्वस्त्वामभिहन्यां ततः स्वस्था भवेयम्, ततस्तत्सर्वमपि नृपश्चक्रे। तत्सर्वं कालिदासपत्न्या दृष्टं प्रच्छन्नवृत्त्या। पुना राज्ञ्या बुधभार्या प्रत्युक्तं–यदि त्वं स्वभर्तुः श्मश्रूणि मुण्डितमुण्डश्च कारयित्वा संसदि प्रवेशयिष्यसि तदा त्वां भर्तृमोहिनीं विद्याम्, तदनु तस्या आग्रहेण कालिदासोऽपि यथानिर्देशं कृतवान्। पर्षदि तथायान्तं कविमालोक्य भूपतिः पप्रच्छ–कस्मिंस्तीर्थे मुण्डितोऽभूः? ॥ ५४ ॥ तदा कालिदासः पद्यगिरा प्रत्यभाषत—

कालिदास? कविश्रेष्ठ!, कुत्र पर्वणि मुण्डनम्?। अनश्वा यत्र नेष्यन्ति, तत्र पर्वणि मुण्डनम्॥ १ ॥
किं किं नाचरते प्राज्ञः, स्त्रीवाचा प्रेरितो नरः। अश्वरूपी भवेद्राजा, मंत्री मस्तकमुण्डितः ॥ २ ॥

अथ यद्वचनस्य विश्वासो गतः स जीवन्नपि मृतो ज्ञेयस्तत्र ५४—दृष्टान्तः—

दृष्ट्वा काकमसिं हि मार्गति नृपो बाणं गृहीत्वा छलात्, पुंखित्वा सुबलेन मुञ्चति यदा काकस्य लग्नं दृढम्।
प्राप्तोऽधो बलिभुक् तदाऽऽह नृपतिं नाहं मृतस्त्वं मृतो, वाक्यं ते नरभूषणं गतमतो धिक् त्वादृशां जीवितम्॥ ५५॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कश्चिद्राजा तरोरध आस्त, अत्रान्तरे कोऽपि काको द्रुमोपरि स्थितः सन् कर्कशशब्देन रटितुमारेभे । तं वीक्ष्य भृत्यमसिमानेतुमादिशद्राजा, स्वयं प्रच्छन्नतया च तूणीराच्छरमेकमुद्धृत्य कार्मुके सयुयोज । तां वार्ता श्रुत्वा वायसो ऽचिन्तयद्—यावदसौ खड्गं गृहीत्वा वृक्षमारुह्य हन्तुमुद्यतोऽभविष्यत्तावदेवोड्डयिष्ये, इत्थं विश्वसन् स्थितः स नृपेण बाणेन हतो विह्वलश्च सबधो भुवि न्यपतत् । अथ सन्निहिते मृत्यौ राजानमूचे, यदहं न म्रिये, त्वमेव म्रियसे, यतो मनुष्यस्य वाक्यमेव भूषणं भवति तस्मात्त्वं च्युतोऽसि, सत्यवचनरूपभूषणाभावे मुखान्निःसृतं वचनं चार्मणं वाद्यमिव विज्ञेयम् । यस्य वचसि जनस्य विश्वासो नास्ति तस्य त्वादृशस्य जीवितं धिग्, किन्तु मरणमेव गरीयः । ॥ ५५ ॥ उक्तञ्च—

असारः सर्वसंसारो, वाचि सारस्तु देहिनाम् । वाचा संस्खलिता यस्य, सुकृतं तेन हारितम् ॥ १ ॥

मग्गियं खग्गफलयं, को उद्देसेण संधिओ बाणो ?। सयं मूओ ण काओ, मुआ ते वयणचुक्काओ ॥ २ ॥

अथ वने तृषार्तानां यक्षशापमृतप्रायाणां चतुःपाण्डवानां यक्षप्रश्नोत्तरेण जीवापने युधिष्ठिरस्यापि ५५—कथा-
सत्रे पांडुसुताः सरोऽपि तृषिता दृष्ट्वाऽब्धिसंख्या गता—स्तत्राऽऽहाऽपेय मे ततो पिब मरिष्यस्युत्तरं नो जलम् ।
नोक्त्वार्थं च तदा सुपीतसलिला निश्चेष्टितास्तेऽभवन्,दत्त्वार्थं हि युधिष्ठिरः प्रतिसुरं जीवापयत्याशु तान्॥५६॥

जातु विपिनमध्ये पाण्डवास्तृषार्ता अभवन्, तत्र नीरं पश्यन्तो चिरकालेन जलसंभृतं तडागमपश्यन् । तदा पञ्चानां मध्यादेकः पयः पातुं वारि समानेतुश्चाऽगमत् । तत्र गत्वा यावत्पयः पातुं प्रारेभे तावत्सरःस्वामी कश्चिद्देवस्तं प्रत्याह—यदि मम

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रश्नस्योत्तरं दास्यसि, तर्हि नीरं पातुं शक्ष्यसीति तदुक्तमश्रुतमिव कृत्वा जलं पपौ मृतश्च । बहुकालं परावृत्त्यागतमनवेक्ष्याऽपरो गतः, इत्थं चत्वारोऽपि भ्रातर एकैकशः कृत्वा तत्र जग्मुः । परमुत्तरस्याऽप्रदानेन तद्वचसो निहता भुवि पेतुः । अथाऽजातशत्रुर्युधिष्ठिरो व्यचिन्तयत्—यो हीतो गच्छति, स न परावर्तते, कात्र वार्ता ? तस्माद् युधिष्ठिरः स्वयं तत्राऽगमत्, चतुरो भ्रातृँश्च विचेतनानद्राक्षीत् । तृषितश्च जलं पातुं प्रवृत्तस्तदा देवताऽब्रवीत्—मम प्रश्नस्योत्तरमदास्यश्चेत्त्वं तर्हीमे चत्वारोऽपि तवानुजा अजीविष्यन् सलिलञ्चाऽपास्यः, उत्तरमदत्त्वा पयः पास्यसि चेत्तर्हि त इव त्वमपि मरिष्यसि । तच्छ्रुत्वा धर्मराजोऽवादीत्—कथय किं प्रष्टुं कामयसे ? ततो यक्षराजः प्रश्नानपृच्छत् धर्मपुत्रो युधिष्ठिरः प्रश्नानामुत्तरं ददौ ॥ ५६ ॥ ते च श्लोका अधस्तनाः—

का वार्ता १ च किमाश्चर्यं २, कः पन्थाः ३ कश्च मोदते ? ४ । इति मे चतुरः प्रश्नान्, पूरयित्वा जलं पिब ॥ १ ॥

अस्मिन्महामोहमये कटाहे, सूर्याग्निना रात्रिदिवेन्धनेन । मासर्तुदर्वीपरिघट्टनेन, भूतानि कालःपचतीति वार्ता २

अहन्यहनि भूतानि, गच्छन्ति यममन्दिरे । शेषा जीवितुमिच्छन्ति, किमाश्चर्यमतःपरम् ? ॥ ३ ॥

तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना, नैको मुनिर्यस्य वचः प्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहायां, महाजनो येन गतः स पन्थाः ॥ ४ ॥

पञ्चमेऽहनि षष्ठे वा, शाकं पचति यो गृही । अनृणी चाप्रवासी वै, स वारिचर ! मोदते ॥ ५ ॥

इत्थं युधिष्ठिरस्य प्रश्नोत्तराणि निशम्य प्रीतः सन् देवो वरं ददौ, यत्ते मृता जीवन्तु चत्वारो भ्रातरः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

### अथेदानीं स्त्रीदुराचारचरित्रोपरि ५६-कथा—

**विप्रस्त्री च बहिर्बिभेमि दिवसे काकात्तदा प्रेषति, सार्द्धं छात्रकमेकदा निशि गृहात्सा निर्गता पृष्ठगः ।**
**मार्गे पश्यति नर्मदोत्तरगतां दत्त्वा हरस्याङ्गकां, सुप्ताऽऽगत्य गृहे तथा ह्यवगतं सोऽवक् चरित्रं तदा ॥५७॥**

पुरा कस्यापि श्रोत्रियस्य गंगापाठकस्य भूसुरस्योपकण्ठे बहवश्छात्राः पठन्त आसन् । परं विप्रस्त्री दिवसे यदा बहिर्याति, तदा स्वभर्त्तारं प्रत्यहं वक्ति—बहिर्निःसृताऽहं वायसाद्बिभेमि, तस्माद्यदाऽहं बहिर्यामि, तदा मया सार्द्धं स्वकीयः कश्चिच्छात्रः प्रेषणीयः, औचित्याद् विप्रोऽपि तथा चक्रे । अत्रान्तरे विप्रान्तिके कश्चिदेकः प्रवीणश्छात्र आसीत्, स व्यचिन्तयदेषा गुरुपत्नी स्त्रीचरित्रमातनोति, अहनि यदा बलिभुजो बिभेति, तदा यामिन्यां किं करोति? एवं विचिन्त्य केनाऽपि व्याजेन स प्रच्छन्नः स्थितः । तदाऽर्धयामिन्यां सा स्त्री गेहान्निर्गता नर्मदायाः पारे गत्वा तत्र स्वकेन जारेण सहाऽरंस्त, पश्चान्नदीमुत्तीर्याऽऽगारमुपागमत् । तत्पृष्ठे कामुकोऽपि नीरमभिताडयन्नैत्, तावदेव जलान्तः कश्चिन्नक्रो भुजङ्गस्यांघ्रिमग्रहीत् । तदानीं तया स्त्रियाऽभिहितम्—ग्राहस्य नयनोपरि पादाघातं कुरुष्व, तथाकृते चरणेन झटित्येव मकरमुखान्मुक्तः । एवं द्वावपि निकेतनमागत्य सुषुपतुः, एतदखिलमपि चरित्रं तेन च्छात्रेण निलीय विलोकितम्, अथ च स्त्रीचरित्रं सम्यग् बुबोध । पश्चादप्यागामिनि दिवसे तया पूर्ववदेव निगदितम्, तत्समये तेन च्छात्रेण निशि यथा दृष्टः सर्वोऽप्युदन्तोऽशेषतो निवेदितः स्वोपाध्यायसमक्षम् । तद्भार्याऽपि तमेव माणवकं छात्रेषु मुख्यं विवेद, द्विजोऽपि तां स्वैरिणीं विज्ञाय तत्याज ॥ ५७ ॥ तथा चोक्तम्—

**दिवा बिभेति काकेभ्यो, रात्रौ तरति नर्मदाम् । कुतीर्थेष्वपि जानाति, जलजस्याक्षिरोधनम् ॥ १ ॥**

For Private and Personal Use Only

अथ संसर्गेण दोषगुणा भवन्ति तत्र द्वयोः शुकयोः ५७–कथानकम्—

दृष्ट्वैकं नृपतिं वने निगदिताः कीरेण भिल्लास्तदा, चाकर्ण्याऽऽशु गतोऽग्रके हि मुनयोऽन्येनाऽपि भात्यर्हकः।
तेऽभ्यागत्य वदन्ति तिष्ठ नृपते! वाक्यान्तराद्विस्मितः, सोऽवक् संगगुणा हि तस्य पितरावेकौ मम स्तस्तथा ५८

कस्मिंश्चिन्नगर एकदा कश्चिद्राजा वक्रशिक्षितवाजिनमारुह्य वनं गतः। तत्रान्तरे प्राप्तभिल्लसंघे कोऽपि तस्करकर्मप्रदर्शकः कीर आसीत्, स भूपालं प्रेक्ष्य वक्तुमारेभे–भोः! धावत धावत, यूयं लुण्टतैनमिति वाचं कर्णपुटीकृत्य राजा घोटकं प्रपलाय्य ततः पलायांचक्रे। किञ्चिदध्वानं गत्वा कस्यापि ऋषेस्तपोवनं प्राविक्षत्, तत्रापि पञ्जरगतः शुको राजानमायान्तं विलोक्य तापसानुवाच–भो आतिथेयाः! एष नरपतिर्युष्मदावासं प्राप्तः, ततोऽस्य श्रान्तस्य सत्कारेणोपकुरुध्वं, तदाकर्ण्य भूपतिस्तुष्टोऽभवत्। तदानीं सर्वे मुनयः शीतोदककुम्भहस्ता विष्टरपाद्यचन्दनमाल्यैर्महीपतिं समपूपुजन्। राजाऽपि विधिप्रयुक्तसत्कारं शिरसा परिगृह्य जगाद–किरातसंघे कोऽपि शुको मां निभाल्योच्चारं चुक्रोश, लुण्टत लुण्टतैनमिति, एष च कीदृशो मधुरवाक् शुक इति शशंस। तदुक्तं निशम्य कीरोऽवग्–राजन्! संसर्गज एष गुणः, आवयोः पितरावेकौ परं स तस्कराणां मध्ये तिष्ठति, अहञ्च मुनिषु निवसामि, तस्मादिदं संगतिफलम् ॥ ५८ ॥ तदोक्तं तेन शुकेन—

माताऽप्येका पिताऽप्येको, मम तस्य च पक्षिणः। अहं मुनिभिरानीतः, स च नीतो गवाशनैः ॥ १ ॥
गवाशनानां स गिरः शृणोति, अहञ्च राजन्! मुनिपुङ्गवानाम्।
प्रत्यक्षमेतद् भवताऽपि दृष्टं, संसर्गजा दोषगुणा भवन्ति ॥ २ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## अथाऽल्पपठनेऽपि सफलपरिश्रमवतो यवमुनेः ५८—कथा—

भूपो यत्र हि गर्दभो यवमुनिं दृष्ट्वाऽऽह तं धीसखः, शत्रुस्तेऽस्ति तदा वधाय निशिगः श्रुत्वाऽऽर्यकां तन्मुखात्।
बुद्धोऽन्तःकरणे विचारयति राड् मे दीर्घपृष्ठोऽनृतो, ज्ञानी साधुरयं हि नो मम रिपुर्ज्ञात्वा गतः स्वालये॥५९॥

कस्मिंश्चिन्नगरे गर्दभसेनो नाम राजा राज्यमचीकरत्। तत्पिता यवनृपो वार्धक्ये वैराग्येण दीक्षां जग्राह, स च यवमुनिरपठितोऽपि सद्वृत्तो विनयी निष्प्रमादी चाऽऽसीत्। अथैकदा केवलं मार्गे चलन् पामरजनेभ्यस्तिस्रो गाथाः श्रुतास्ताः कण्ठीकृताश्च। ततः स साधुः स्वपुत्रादिनाऽऽत्मानं वन्दापयितुं तस्मिन्पत्तने कुम्भकारगृहमध्यतिष्ठत्। तत्काले राज्ञो दीर्घ पृष्ठनाम्ना मुख्येन सचिवेन नृपस्य रूपवती 'अडोलिकाख्या' भगिनी निजसद्मनि संगोप्य स्थापिता। यदा साधुरागतस्तदा मन्त्री मनसि भीतो व्यचिन्तयत्—असौ साधुरन्तर्यामित्वादमूं वार्तां राज्ञे निवेदयिष्यति, तस्मादीदृशः कश्चिदुपायो विधेयो येन भूपो विमनस्को भूत्वा साधुं हन्यान्निस्कासयेद्वेति विचिन्त्य भूपालं प्रत्यवोचत्—तव पितुश्चेतः स्वधर्माच्चलितं, अतो दत्तमपीदं राज्यं पुनर्जिघृक्षति, इति श्रुत्वा गर्दभनृपश्चुकोप। अथ स निशि परमर्षिं हन्तुं कुलालनिकेतनमायात्, तदागमनवेलायां यवमुनिर्विजने पूर्वश्रुतं गाथात्रयमभ्यसन्नास्ते। ता गाथाः समाकर्ण्य परमार्थश्च विदित्वा राजा प्रतिबोधं प्राप, विवेद चाऽस्माकं जनकस्तु तत्त्वविद्, मम स्वान्तस्योदन्तं याथार्थ्येनाऽचकथत्, तस्मादेष प्रधानः किंसखा। अस्या गाथायाः प्रमाणेन मदीया भगिनी स्वहर्म्ये भूमिगर्भे प्रच्छन्नीकृता तेन दुष्टेनेति ज्ञायते, अत एव साधोर्मम पितुरुपकण्ठं गन्तुं निषेधति, परमेष कथमपि रिपुर्न प्रतिभाति, मद्राज्यमपि न कामयत इत्यालोच्य स्वसौधं



For Private and Personal Use Only

परावर्तत । द्वितीयेऽह्नि मंत्रिसदनमशोधयत्, तदन्तर्वेश्मतश्च स्वां भगिनीं निष्कासयामास । ततो राज्ञा निर्वासितः प्रधानो महतीं यातनामन्वभूत्, साधुश्च तत्प्रभावाज्जीवितोऽकालमृत्युना ॥ ५९ ॥ याभिर्गाथाभिस्तस्यार्थो निष्पन्नस्ता अधस्तनाः—

आधावसि पधावसि, ममं चावि णिक्खसि । लक्खितो ते मया भावो, जवं पत्थेसि गद्दहा ! ॥ १ ॥
इओ गया तओ गया, मग्गिज्जंति न दीसंति । अहमेवं विजाणामि, अगडे छूढा अडोलिया ॥ २ ॥
सुकुमालग ! भद्दलग !, रत्तिं हिंडणसीलग ! । भयं ते णत्थि मंमूला, दीहपुट्ठाउ ते भयं ॥ ३ ॥
सिक्खिअव्वं मनुस्सेणं, अवि जारिसतारिसं । कीम मूढसिलोगेण, जीवियं परिरक्खियं ॥ ४ ॥

अथ प्रत्युत्पन्नमतेः कपेः ५९–कथा—

तीरे चाम्रफलं सदा कपिवरो मीनाय दत्ते तदा, लात्वा स स्वगृहे स्त्रियै वदाति सा तद्धक्षकं ह्यानय ।
कृत्वाऽऽरोहणमेत्य तं जलनिधौ मेऽस्त्यङ्गना ते हृदं, वक्ति मूढ ! नगे मया किमु कृतं ? बुद्ध्याऽऽगतो जीवितः ।६०।

कुत्रचित्समुद्रोपकण्ठे कश्चिदाम्रपादपोऽस्ति, तस्य मधुराणि फलानि कपयः खादन्तिस्म । तत्र कस्यचिद्वानरस्य मत्स्येन सह सख्यमभवत्, तस्मात्स झषाय सुस्वादु रसालफलं प्रयच्छति । एवं कुर्वन्नेकस्मिन्नहनि मीनो माकन्दफलं निजस्त्रिया अदात्, भक्षणे माधुर्यतया मत्स्यमवादीत्सा, यो ह्यमूनि फलानि खादति तस्य हृदयं तु मधुरतमं भविष्यति, तस्माद् भोः स्वामिन् ! तमत्रानय, तद्हृदयाभ्यवहरणेन मे मानसेप्सितं पूर्णं स्यात् । तदाकर्ण्य झषो हरिमभ्येत्याऽब्रवीत्—भो मित्र ! मद्गृहं चलित्वा जलधिजललहरीजनितकौतुकं वीक्षस्व, मद्भार्याऽपि तव प्रेम्णा दर्शनसमुत्सुका विद्यते । अपि च म एव सुहृद्वरो यो ह्यन्योन्यसद्मनि



For Private and Personal Use Only

गमनागमने पानाशने च करोति, परस्परमादानं प्रदानञ्च विदधाति, इत्थं कर्णामृतं तद्वचनं निशम्य झटित्येव सरलचित्तत्वेन मर्कटोऽपि गन्तुमुद्यतः। अथो मीनः कपिं स्वपृष्ठमारोप्य पयोधौ चचाल, किञ्चिद् व्रजित्वा मत्स्यः कीशमूचिवान्—सखे! त्वं कथयेश्चेत्तर्हि तथ्यं वच्मि, हरिर्जगाद—सुखेन ब्रूहि। मत्स्य उवाद—मद्योषित्ते हृदयं जिघत्सति, इत्याकर्ण्य समुत्पन्नमतिः शाखामृगो जहास, तमवोचच्च—भो भ्रातः! किमत्र दुष्करम्? परं त्वम्मे मूढः प्रतिभासि। अरे! प्रागेव, तत्कस्मान्न निवेदितम्? अहन्तु तदाम्रे बध्वाऽऽगतोऽस्मि, त्वद्वाञ्छा चेदधुनाऽप्याऽऽहरामि, झषोऽपि तथाकर्तुमादिश्य परावर्तत। पश्चाद् वानरोऽपि तीरमासाद्योत्प्लुत्य च सहकारविटपमारुरोह, प्रत्युत्पन्नबुद्ध्या जीवँश्च भद्रशतानि ददर्श ॥ ६० ॥ उक्तञ्च—

दोहा—मित्त ! फुड़ाफुड़ि बोलिए, न जंपीह अलिएण। मुझ महिला तो जीवशे, खाधे तुज्झ हिएण ॥ १ ॥
रे जलचर ! सुहलक्खणा, एको काज न किद्ध। घटभीतर जे कालजूँ, सो में आँबे बद्ध ॥ २ ॥
गया कपी महिमंडले, जलचर जा निज घर। तुझ महिला जीवे नहीं, तो तूं साथे मर ॥ ३ ॥
जलचर जीव कुबुद्धिआ, एको काज न सिद्ध,। घटभीतर जे कालजूँ, सो किम आँबे बद्ध ? ॥ ४ ॥

अथोत्तमानुत्तमैरपि शोभते समुदायस्तत्र ६०—कथा—

वक्तीशः सचिवं हि दीर्घलघुभिर्द्रंगं गृहैर्भाति नो, ये पूर्णा धनमन्दिरेण च पुरे ते रक्षणीया जनाः।
विद्यन्ते यदि पञ्च षड् वदति भोः! शून्यं पुरं स्यात्तदा, तत्त्वं मा कुरु तं तथाऽस्तु नृपते! तद्वङ्गणे साधवः ॥६१

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एकस्मिन्पुरे कोऽपि नृपः स्वकीयं सचिवं कथयति स्म–अस्माकं पत्तने कियन्तो रंका वित्ताढ्याश्च मनुजा निवसन्ति, तेषु कति विशालभवनानि, लघुहर्म्याणि चाऽतो नगरं न शोभते, तस्मात्प्रचुरद्रविणवन्तो लक्षाधीशाः पञ्चभूमिप्रासादका एव रक्षणीयाः, सामान्याश्च निष्कास्यास्तर्हि मे नगरं प्रेक्षणीयं स्यात् । एवं नरपतिकथनं श्रुत्वा कुशाग्रबुद्धिर्मन्त्री व्याजहार–राजन् ! एवं कृते सति पंचशाण्येव गृहाण्यवशिष्यन्ते, कृत्स्नं च पत्तनं रिक्तं भविष्यति, तस्मान्मैवं कुर्वेति संबोधितो भूपो मन्त्रीवचनानुकूलं यथाऽवस्थितानेव नागरिकानस्थापयत् । एतत्तु दृष्टान्तमात्रम्–प्रकृते गच्छेषु सर्वे साधवो ज्ञानक्रियाभ्यां सदृशा न भवन्तीति योऽपकृष्टः स निष्कासनीयो न भवति, प्रत्युत तस्य धर्मबुद्धिः स्थिरीकर्तव्या, धर्ममाचरितुं संवर्धनीयश्च सज्जनैः ॥६१॥ तदुक्तमपि—

नगरे सदृशाः सर्वे, भवन्ति धनिनो नहि । गच्छेऽपि साधवो ज्ञान–क्रियाभ्यां सदृशा नहि ॥ १ ॥

अथ प्रिय एव सत्कारमेति तत्र द्वयोर्जामात्रोः ६१–दृष्टान्तः—

स्वेष्टानिष्टसमागतौ स्वसदने जामातृकावेकदा, भुक्त्यर्थं निकटे स्थितौ वनितया स्थाल्यां तदाऽऽदेवरम् ।
भक्तं सत्तरलां परस्य शिथिलां स्थूलीं विलोक्याऽह्य किं,सोऽवग् मे यदि वां किमस्ति तिलकं श्वश्रूः करोम्यास्यकम् ६२

कस्यापि श्रेष्ठिनो गृहे द्वौ जामातरौ प्राघुणिकौ भूत्वा समागतौ, तयोरन्यतरः पत्नीप्रस्वाः प्रियतर आसीत्, द्वितीयश्चाऽनभिमतः, पश्चाद् द्वावपि भोक्तुं निकट एवोपविष्टौ । तदा तया श्वश्र्वा स्वेष्टाय जामात्रे स्थाल्यां विलेपीपायसादिकं परिवेषितमपरस्मै च यवानां स्थूलिकां संराद्ध्य परिवेषिता । तदा निकृष्टभोजनो जामाताऽपरस्य जामातुः पुरो विशिष्टान्नं प्रेक्ष्य प्रोवाच–हे श्वश्रु !



For Private and Personal Use Only

त्वं परिवेषयन्ती विसस्मर्थ, उत मम भाग्यदोषेणैव श्राणापायसप्रभृतीनि व्यञ्जनानि च किं स्थूलिकारूपेण संपन्नानि? ततः श्वश्र्वाऽभिहितं नाहं व्यस्मार्षम्, न चापि क्षैरेयपायसाज्यादिः स्थूली परिणता, किन्तु वदनं वीक्ष्य स्थासकः स्थापितः, तस्मात्स्थूलीमेव जग्ध्वा सन्तोषेण सहर्षं समुत्तिष्ठ ॥ ६२ ॥ तयोरुक्तिप्रत्युक्ती यथा—

दोहा—एके भाणे लापसी, एके भाणे थूली। केतो सासू साबकी, परसण वाली भूली?॥ १ ॥
तदुत्तरं—नहि है सासू साबकी, न परसण वाली भूली। मुख देखी टीलुं कियुं, मार गटागट थूली ॥२॥

स्वल्पोऽपि नियमोऽतिलाभाय संपद्यते तत्रैकश्रेष्ठिनः ६२-कथा—

शीर्षं वीक्ष्य ततोऽश्नि सद्गुरुमुखादेतद् गृहीतं व्रतं, चक्री त्वेकदिने गतः स मृतिकाखन्यां वणिक् पृष्ठगः।
द्रव्यं तत्र हि निर्गतं स च वणिक् दृष्ट्वेत्यवग् दूरतः, त्वं मा याहि गृहाण चार्धविभवं लात्वाऽऽलये सोऽगमत् ॥६३

पुरा कस्मिंश्चिन्नगरे धर्मगुरुरागात्, तदा बहुभिर्लोकैर्व्रतं गृहीतं, तेष्वेकेन वणिजा कुलालमस्तकं वीक्ष्यैवाहमश्नीति नियमो गृहीतः, पश्चात्स निरन्तरं कुलालकपालं विलोक्यैव भोजनं कुरुते स्म। एवं कुर्वन्नेकस्मिन्नहनि कुम्भकारो मृत्स्नामानेतुमगमत्, स च वणिक् तद्गृहमागतस्तदानीं तद्भार्यया तदुदन्तं लब्ध्वा पुनर्मृत्खननस्थानेऽयासीत्, तस्मिन्नेव क्षणे कुलालो मृत्तिकां खनन् द्रव्यभाण्डं प्राप। ततः कुलालमस्तकं विलोक्य श्रेष्ठी कथयामास—दृष्टं रे दृष्टं, तन्निशम्य चक्री व्यचिन्तयदनेन द्रव्यभाण्डो विलोकितः, अतस्तत्रैव स्थितः सन्नाजुहाव वैश्यम्। 'यदानन्दमेवानन्दं लभ्यमेव लब्धमिति ब्रुवंस्तदभिमुखं प्राधावीत्, अमद्यार्धं ते त्वमर्धञ्च ममेति श्रुत्वा वणिक् परावर्तिष्ट द्रव्यार्धमादाय गृहमागतः। तस्माद् यादृशस्तादृशः कोऽपि नियमो नूनं फलप्रदो जायते ॥६३॥ कथितमपि—

योऽपि सोऽपि ध्रुवं ग्राह्यो, नियमः पुण्यकांक्षिणा । स्वल्पोऽप्यनल्पलाभाय, यथा खल्वाटदर्शकः ॥ १ ॥

अथानन्तानुबन्धिकोपस्योपरि दन्तपातककुशिष्यस्य ६३-कथा—

लब्ध्वा सर्षपशाकमाशु गुरुणा जग्धं तदा कोपतः, शिष्यश्चिन्तति पातयामि दशनानास्याद् गुरोश्चैकदा । कृत्वा तेऽनशनं दिवं शवमुखाद्दन्तांश्च सोऽपातयत्, मृत्वा क्रोधवशेन चैव नरकं प्राप्तोऽविनीतो जडः ॥६४॥

कस्मिंश्चित्पत्तने गुरुशिष्यौ विचरन्तौ समागतौ, तत्र शिष्यो भिक्षामटितुं गतो, भिक्षायां सर्षपशाकं लब्धवान् । तच्च गुरुणै-काकिनैव खादितम्, शिष्याय न दत्तम् । ततो रुष्टः शिष्यो व्यमृशत्-अनेन मह्यं शाको नार्पितस्तस्मान्नूनमेवास्य रदनानुत्पाटयिष्यामि जीवतस्तु केनाप्युपायेन दशनास्त्रोटयितुं न शक्यन्ते, इत्थं चिन्तयतस्तस्य दिनानि व्यतियन्ति स्म । एकस्मिन्दिवसे गुरुः सुबुद्ध्या-नशनं कृत्वा दिवमारुरोह । शिष्यश्चान्तेऽवसरं प्राप्य केनाप्युपायेन स्वगुरोर्दन्तानत्रोटयत् । तेन कुकर्मणा स क्षुल्लकः प्रेत्य घोरे नरके पतितः, अविनीतश्च लोके जिनशासनदूषकोऽभवत् । एषोऽनन्तानुबन्धी रोषोऽत्याहितकरस्तस्मात्परिहर्तव्यः ॥६४॥ उक्तं च-

यो भवेज्जगति गर्वगर्जितो, दीर्घरोषसहितश्च मानवः । प्रेत्य घोरनरके व्रजेत्तथा, दन्तपातकलुषान्मुनिर्यथा ॥ १ ॥

अथ धनस्याऽऽदरोपरि भगिनीसोदरयोः ६४-कथा—

निःस्वं सोदरकं निरीक्ष्य भगिनी भ्राता न मे सूपकृत्, श्रुत्वा तद्वचनं धनं जनपदे लात्वाऽऽगतस्तद्गृहे । स्थाल्यां मुञ्चति खादिमं वदति स स्वाभूषणान्यत्त भोः!, किं भ्रान्तो वदसीति? येषु सुकृतस्तेषामहं पूर्वगः ॥६५

कश्चिद्धनो मनुष्यः कयाचिदाशया स्वभगिनीसमीपं गतः। तत्र सा सोदरं मलिनवेषं दृष्ट्वा व्रीडिता सती बभाण–नायमस्मद्भ्राता किन्त्वस्मत्पितुर्गृहे चुल्लीफूत्कृत्सूदः। तस्या वचनं श्रुत्वा व्यग्रीभूय स वित्तमुपार्जितुं विदेशे गतः। तत्र प्रचुरं धनं संचित्य गृहीत्वा च स्वसृवेश्म पुनः प्रत्यागतः। तदानीं तं धनवन्तं बुध्वा द्रव्यप्रेमवशेन साधु पर्यपूजयत्, भोजनवेलायाञ्च पात्र्यां षड्रसभोजनानि पर्यवेषयत्। तदानीं स पूर्वगतदिवसं स्मृत्वा केयूरप्रभृतीनि भूषणान्युत्तार्य स्थाल्याममुंचत्, तथा च वक्तुं प्रवृत्तो येन मद्भगिनी शृणुयात्। भो भूषणानि! यूयमेव पुरःस्थितं भोजनं भुंग्ध्वम्। ततः स्वसाऽवदत्–हे भ्रातः! किमु निगदसि? विचारमूढस्तु न संवृत्तः? अथ सोदरः प्रत्युवाच– नाहं विचारमूढः किन्तु यान्यवेक्ष्य त्वयैतदशनं परिवेषितं तान्येव भोजयामि। यदा प्रागागमं तव गृहे तदा त्वया स्वपितुः सूपकृद् भाषितोऽहं तस्मान्मानं काञ्चनमेवाश्रयते ॥ ६५ ॥ यतः—

दोहा–गरथें आदर दीजिये, सत्कारीजे दाम। पहिले फेरे आपिओ, चुल्ली–फूँकण नाम ॥ १ ॥

अथैकान्तेनैव सुनाम्नि गुणो न भवति तत्र ठण्ठणपालस्य ६५–कथा—

नाम्ना ठण्ठणपालकोऽस्ति धनवांस्तस्यांगना चिन्तति, नो तिष्ठामि गृहेऽस्य यामि धनपालस्य स्वगेहाद् गता। दृष्ट्वाऽध्वन्यमरं मृतं च धनपं ह्यन्यालये भिक्षितं, लक्ष्मीं काष्ठकविक्रयां गृहगता ज्ञात्वा शुभं ठण्ठणम् ॥६६॥

कस्मिंश्चिन्नगरे सर्वकलाकुशलः पंचाग्रगण्यो ठंठणपालनामा धनिको निवसति स्म। तस्य स्त्री यदा बहिर्याति तदा ठंठणपाल-योषिन्नाम्ना लोकास्तामाह्वयन्ति। ततः सा व्यचिन्तयत्–अधुना ठंठणपालस्य गेहे नैव स्थातव्यं, किन्तु कस्यापि धनपालस्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जगत्पालस्य वा शुभसंज्ञस्य सद्मनि पत्नी भूत्वा निवासः श्रेयान्, एवं संप्रधार्य गृहान्निश्चक्राम । अग्रे पथि यान्ती—अमरपालनामानं मृतं ददर्श, ततः किंचिदग्रे गत्वा धनपालसंज्ञं याचमानमपश्यत्, पुनः कतिचित्पदानि यात्वा लक्ष्मीनाम्नीमिन्धनं विक्रीणतीमवालोकत । इत्थं सर्वानपि स्वस्वाभिधाप्रतिकूलमाचरतो विलोक्य निर्णिनाय-गुणेषु नाम्नां कारणता नास्ति, तस्मादस्माकन्तु ठंठणपालपतिरेव शुभः । तथोक्तं, दोहा—अमर मरन्तां मे सुना, भीखन्तां धनपाल । लछमी छाणा वेंचती, भलो छे ठंठणपाल ॥ १ ॥

अथ गुणग्राहिणा सन्नरेण भवितव्यं तत्र कृष्णस्य ६६—कथा—

इन्द्रः संसदि वाक्यमाह नृभवे कृष्णो गुणग्राहको, भूत्वा श्वानमृतः सुरो निपतितो मार्गे तमालोक्य सः ।
दन्तश्रेणिशुभां शुनोऽपि सकलं त्यक्त्वाऽशुभं दोषकं, श्रुत्वाऽभूत्प्रकटः सुरो दिवि गतो धन्योऽसि नत्वा हरिम् ॥

जातु शक्रः स्वसंसदीत्थमभाषत, यत्संप्रति मर्त्यलोके कृष्णवासुदेवप्रतिमः कोऽपि गुणज्ञो नास्ति । तद्वचनं निशम्य कोऽपि देवः श्रीकृष्णस्य गुणग्राहित्वं परीक्षितुं प्रेतकुक्कुररूपं धृत्वाऽध्वनि पपात, ततस्तस्मात् पूतिश्च निस्ससार । कृष्णवासुदेवस्तं विलोक्य तद्दोषानपहृत्य जगाद—अस्य सारमेयस्य द्विजराजी कीदृशी मनोरमा ? एवं मृतशुनो गुणान् जग्राह, दोषांश्च जहौ । श्रीकृष्णस्यैवं गुणज्ञतां दृष्ट्वा प्रतीतो देवः स्वस्वरूपमास्थाय श्रीकृष्णस्य चरणौ ववन्दे । पुनस्तं संस्तुत्य वरञ्च दत्त्वा स्वावासमयासीत् । अतो भव्यैर्गुणो ग्राह्यो दोषस्तु हेय एव ॥ ६७ ॥ उक्तञ्चापि—

संसारे सुखिनो जीवा, भवन्ति गुणदर्शकाः । उत्तमास्ते च विज्ञेया, दन्तवीक्षककृष्णवत् ॥ १ ॥
अमलत्वं रसज्ञाया, मिश्रयोः क्षीरनीरयोः । विविच्य पिबति क्षीरं, नीरं हंसोऽपि मुञ्चति ॥ २ ॥



For Private and Personal Use Only

असंख्याः परदोषज्ञाः, गुणज्ञाश्चापि केचन । स्वयमेव स्वदोषज्ञाः, विद्यन्ते किल पञ्चषाः ॥ ३ ॥
छीरमिव जहा हंसा, जे घुट्टंति गुरुगुणसमिद्धा । दोसे विवज्जयंतो, तं जाण सुजाणयं पुरिसं ॥ ४ ॥

अथ सम्यक्त्वधर्मदार्ढ्ये श्रेणिकनृपस्य ६७–कथानकम्—

सम्यक्त्वं किल वर्णितश्च हरिणा श्रीश्रेणिकस्यामरो, भूत्वा साधुनिभस्तदा जलचरान् गृह्णाति तत्राऽऽगतः ।
दृष्ट्वा वक्ति किमाः करोषि ? हि मुने ! त्वं सद्दयाहेतवे, दुर्भव्यस्त्वमसीति नो जिनमते कृत्वा स्वरूपं स्तुतः ।६७।

कदाचित्पुरन्दरपरिषदि सम्यक्त्ववार्ता समुपक्रान्ता तदानीमिन्द्रः श्रेणिकनृपतेः सम्यक्त्वं प्रशशंस । तदाकर्ण्य मिथ्यादृष्टिः कश्चिद्देवो भूपं परीक्षितुं मुनिनेपथ्यं विधाय धर्मध्वजं मुखपत्तिकां दण्डं कम्बलञ्चानीय सरस्तटे स्थितः । तत्र मत्स्यान् ग्रहीतुं प्रवृत्त-स्तं तथा दृष्ट्वा मार्गे गच्छता श्रेणिकेन राज्ञोक्तम्—साधो ! मुनिप्रतीपं कर्म कस्मादनुष्ठीयते ? मुनिवेषञ्च कथं विडम्बयसि ? तदा कपटमुनिर्बभाषे—राजन् ! त्वं साधुधर्मविषये किं जानीषे ? अहं झषान्निष्कास्य विक्रीय च कम्बलं क्रेष्यामि, तस्माद्वर्षर्तौ जीव-रक्षा भविष्यति । यतो भगवता जलस्यैकस्मिन्बिन्दावपरिमिता जीवा भवन्तीत्युक्तम् ते वै जीविष्यन्ति चाऽन्यथा मरिष्यन्ति । तच्छ्रुत्वा राजाऽवोचत् त्वं दुर्भव्योऽनंतसंसारी परिदृश्यसे यत्साधुवेषी भूत्वापीदृशं कुकर्म करोषि । जैनशासने तु नैवं क्वाप्यमाणि, जैनागम-विरुद्धमेतद् इत्थं तं तिरस्कृतवान्, परमपरं मुनिं न निनिन्द । स देव इत्थं नृपं सम्यक्त्वेऽतिदृढं विदित्वा स्वरूपं प्रदर्श्य तं भृशं प्रशशंस, स्वस्थानञ्च गतः । ॥६८॥ कथितं चापि—

क्रियाहीनं कुसाधुश्च, दृष्ट्वा चित्तं न चालयेत् । तत्सम्यक्त्वं दृढं ज्ञेयं, धर्मे श्रेणिकभूपवत् ॥ १ ॥

अथ जीवदयामधिकृत्य तत्रैकस्य भूपस्य ६८-कथा—

भूपः संसदि वर्णितो हि हरिणा देहीति देवो गतः, श्रुत्वाऽवक् नृबलिं न चेत्पुरजनान्हन्मीति मंत्रोऽभवत् ।
सोपायश्च तदा जनैर्नृशिशुकं लात्वा वधायार्पित-स्तत्स्थाने नृपतिः स्थितो ननु सुरस्तुष्टो नृपं श्लाघते ॥६८॥

पुरा पुरन्दरेण निजपरिषदि कश्चिद् भूपः संस्तुतः, तच्छ्रुत्वा तं परीक्षितुं कश्चिन्मिथ्यादृष्टिदेव आगत्य राजानमुवाच-राजन् ! मह्यं नृबलिं देहि, न प्रयच्छसि चेत्सर्वानेव नगरवासिनो हन्मि। नृपेणोक्तम्—नरबलिवार्ता स्वप्नेऽपि कर्तुं न शक्या क्व पुनस्तद्दानम् ? तदा देवो नगरमात्रीं शिलां नगरोपरि प्रक्षेप्तुं सज्जितोऽभवत् । तां दृष्ट्वा भीतिविह्वलाः पत्तनवासिनो भूपालमूचिरे-भो महीपते ! एकस्य कृते बहूनां वधो भविष्यति, अत एकं नृबलिं दत्त्वाऽखिलाञ्जनान् रक्ष । तत उर्वीपतिराह—एतत्कर्तुं मया न शक्यते, यद्-भाव्यं तदेव भावि । पुनः किमस्ति कोऽपीदृशः परोपकारी यो हृष्टो मर्तुं वाञ्छेत, येन नरेण च देवं यजेथमिति ? इत्थं दृढां राजोक्तिं निशम्य सर्वैः सम्भूय तदानीं चिन्तितम्—कोटिमुद्राणां स्वर्णपुत्तलिकां कोटिदीनारांश्च कस्मैचिन्निर्धनाय प्रयच्छामः, प्रतिफले च तस्मात्पृथुकं गृह्णीमस्तर्हि देवबलिं दत्त्वा स्वस्थचित्ता भवेम । इत्थं सर्वैर्निश्चित्य तथाकृते सति कश्चन निःस्वः पुरुषः प्रीतः पुत्रं प्राय-च्छत्, तमुपराजं नीत्वा बलिसदने स समुपवेशितः । बालो नृपं निभाल्य हसन्नुवाच, सुप्रभातमद्य मे यतः—प्राणिनां मृत्युर्ध्रुवः, तस्मादेकोऽहं स्वशरीरव्ययेन सर्वानपि पत्तनवासिनो जनान् जीवयिष्ये । एतच्छ्रुत्वा कृपालुः प्रजानाथस्तत्पदमध्यतिष्ठत । ततः प्रीतो देवो महीपतिं स्तुवन् वक्तुं लग्नः—हे दयालो ! त्वं यथेन्द्रेण सदसि वर्णितस्तथैवासि । इत्युक्त्वा देवः स्वस्थानमगमत् । कथितञ्च—



For Private and Personal Use Only

सोनुं शरीर देइने, ऊपर कंचन कोड़ि । आणि बाल बेसाड़ियो, बालि देवाने ठोड़ि ॥ १ ॥
नृप सामुं देखी हसे, बालक मन उल्लास । देखि दया नृप मन धरी, बेठा बालक पास ॥ २ ॥
बाल तजी मुझने भखो, जो हो बलिनुं काज । सुर संतोषे इम कहे, कर नृप अविचल राज ॥३॥

अथ पुनर्दयोपरि मेघरथनृपस्य ६९–कथा—

वज्री पर्षदि वक्ति मेघरथको भूपः कृपातत्परो, भूत्वा तौ विहगौ तदा हि नृपतेरुत्सङ्गके साध्वसात् ।
रक्षाक्षोऽपतदीश ! रक्ष शरणे तं तद्भयं मा कुरु, श्येनायाऽऽत्मपलं ददौ स च सुरो नत्वाऽऽशु नाकं ययौ॥७०

अथैकदा सुनासीरः सदसि मेघरथनृपं दयालुत्वे धीरत्वे च नुनाव। तां वार्तां श्रुत्वैकः कश्चिद्देवः पारावतस्य परः श्येनस्य च स्वरूपमास्थायोभौ प्रस्थितौ। श्येनः पारावतमभ्यवहर्तुमभ्यधावत, पारावतो धावित्वा भूजानेरङ्कमध्यतिष्ठत्, वेपमानश्च महीपालं प्रोवाच–हे धरापते! श्येनादस्मात् त्रायस्व माम्, तदा नृपस्तं स्वाङ्के समुपावेशयत् । तत्रान्तरे श्येन आगत्य क्षोणीपतिं बभाण–"भो मनुजेश्वर ! त्वममुं विहगं परिहर, यतो बहुदिनेभ्यः क्षुधया पीडितोऽस्मि। न मुञ्चसि चेन्मह्यमियत्परिमाणमेव स्वमांसं देहि । तच्छ्रुत्वा पृथ्वीपालः स्वमांसं कर्तित्वा २ दातुं प्रवृत्तः, परं देवमायया तन्मांसं कपोतपरिमाणकं नाऽभवत्। ततो राजा सदेहस्तुलायामारूढः, श्येनश्चावदत्–भोः पत्रिवर ! मत्पिण्डमश्नान । तथा गदन्तं नृपं निभाल्य देवस्तुतोष व्याजहार च–गरीयसी ते सत्यसन्धतेति तं प्रणम्य च स्वावासमुपेयाय ॥७०॥ उक्तश्च—

दयावन्त सुर सांभली, कर पंखी बे रूप । एक भूप खोले पड़ा, एक दिये तस दूप ॥ १ ॥
राजा सुरशुं इम कहे, मूक कबूतर एह । हठ पकड़ी मूके नहीं, भूप दिये तस देह ॥ २ ॥
अतुल पुण्य उपराजियो, पामे पदयुग ठोड़ । दया प्रभावे देवता, सेव करे कर जोड़ ॥ ३ ॥

अथ हिंसानिषेधोपदेशे धनपालपण्डितस्य–७०–कथा—

श्रुत्वाऽजावचनं हि भोजनृपतिर्यज्ञे बुधान् पृच्छति, प्रोचुस्ते किममी वदन्ति ननु? तं विज्ञप्तिकामीश! ते ।
कीदृक् सा शृणु काव्यमेव कविना प्रोक्तं प्रबुद्धस्तदा, मुक्त्वा सर्वपशून् कृतो हि नियमो यज्ञस्य धर्मे रतः ॥७१

अथैकदा भोजभूपालो यज्ञे हवनार्थं छागानानाययामास 'ते बहुशो मे मे शब्दश्चक्रुः' । ततो नृपो धनपालपण्डितं पप्रच्छ, कस्मादेते छागाः शब्दायन्ते ? बुधोऽवदत्–राजन् ! एते प्रार्थयन्ते, सर्वे लोकाः सम्भूय शृणुत । तदैव पुनर्नृपः पप्रच्छ–'किमेते निवेदयन्ति ? यदि जानासि तर्हि कथय ।' ततः कविः पद्यगिरोवाच—

नाऽहं स्वर्गफलोपभोगतृषितो नाभ्यर्थितस्त्वं मया, सन्तुष्टस्तृणभक्षणेन सततं साधो ! न युक्तं तव ।
स्वर्गं यान्ति यदि त्वया विनिहता यज्ञे ध्रुवं प्राणिनः, यज्ञं किन्न करोषि मातृजनकैः पुत्रैस्तथा बान्धवैः? ॥१॥

"हे नरनाथ ! एते कथयन्ति–यदि यज्ञे पशवो होमेन स्वर्गं लभन्ते, तथापि नो वयं स्वर्गैषिणः," यज्ञाच्च जीवः स्वर्गं याया–त्तर्हि स्वबान्धवान् हुत्वा स्वर्गे कथं न प्रेषयसि ?। यतः प्रिय एव गरीयसा श्रेयसा सुबुद्ध्या योज्यते नरः। नाहं वो जननी जनकश्चेति

च्छागा ब्रुवन्ति ' एतच्छ्रुत्वा राजा प्रतिबुबोध। पण्डितवचनं हितकरं मत्वा सर्वानपि च्छागान् मोचयामास। यज्ञप्रत्याख्यानश्चाऽकरोत्, जगत्तरणतारणप्रधाने सुधर्मे च निजमतिं स्थापयामास ॥ ७१ ॥ यतो धर्मशास्त्रे जैनधर्ममाहात्म्यमुक्तमपि—

जैनधर्मविनिर्मुक्तो, मा भूवं चक्रवर्त्यपि। स्यां चेटोऽपि दरिद्रोऽपि, जिनधर्माधिवासितः ॥ १ ॥

अथैकमत्ये लक्ष्मीर्वसति तत्रैकश्रेष्ठिनः ७१–कथानकम्—

सुप्तेभ्यं कमलाऽऽह यामि सदनात्त्वं याचयेर्मा तदा, याचिष्ये हि वरं प्रभातसमये पृष्टः कुटुंबश्च किम्?।
याचे वक्ति पृथग् धनं लघुवधूः स्नेहं कुटुम्बेऽर्पय, तद्वाक्यं कथितं हि तेन च तया त्वद्यन्त्रिता यामि नो ॥७२॥

एकस्मिन्नगरे स्वालये कश्चित्श्रेष्ठी स्वसम्पत्तिनिर्भरसुखनिमग्नेन निशि सुप्तोऽभवत्। तत्रान्तरे कमलाऽऽगत्य तं वदति–भोः श्रेष्ठिन्! संप्रत्यहं त्वद्गेहाद् व्रजिष्यामि, तव कश्चिद् वरो वरणीयस्तर्हि वृणीष्व, तं ददामि तुभ्यम्। ततः श्रेष्ठी जगाद–इदानीन्तु नाहं याचे, प्रभाते स्वपरिवारमापृच्छ्य वरं निवेदयिष्यामि। ततो लक्ष्मीरुवाच–साधु श्रेष्ठिन्! ततः सोऽपि प्रभाते कलत्रादीन् प्रष्टुं प्रवृत्तस्ते च पृथक् २ धनादिमार्गणार्थमूचिरे। अत्राऽन्तरे कनिष्ठपुत्रवध्वाऽभिहितम्–भोः श्वशुर! अस्मत्कुटुम्बे संमतिश्चिरं तिष्ठेदिति याचस्व। श्वशुरोऽपि तद्वचनं समर्थयामास, पुनरग्रिमे दिवसे रात्रौ लक्ष्मीरागत्य श्रेष्ठिनमवोचत्–वरं वृणीष्व ततः श्रेष्ठ्यवक्–अस्मास्वैकमत्यं स्यादित्येव प्रार्थये। तदनु बुद्धिविमला कमला जगाद–अधुना त्वहं केनापि प्रकारेण गन्तुमेव न शक्नोमि, यतो यत्र जनेषु सम्मतिस्तत्र रमावासो निश्चितं भवत्येव ॥ ७२ ॥ उक्तश्च—

शेठ संप जब मांगियो, रमा कहे करजोड़। अब मैं कैसे जा सकूँ?, राखी बाँह मरोड़ ॥ १ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तया च-गुरवो यत्र पूज्यन्ते, यत्र वित्तं नयाऽर्जितम् । नो दन्तकलहो यत्र, तत्र शक्र ? वसाम्यहम् ॥ २ ॥**

**अथ कृपणनामोच्चारणमपि विघ्नजनकं तत्र ७२-कथा—**

**कश्चित्पृच्छति किङ्करं वद हयः कस्येति यस्यास्म्यहं, कस्य त्वं जवनेशितुर्मम तवेशाख्या न किं कथ्यते ? ।**
**सोऽवक् हे ! क्षुधितोऽस्मि खादिममिदं लाहीशगोत्रं द्रुतं, प्रोक्तं तेन तदा हयेन निहतस्तन्नामतस्तत्फलम् ॥७३॥**

कदाचित्कश्चिन्मनुजोऽभिरूपं वाजिनमपश्यत् । ततस्तद्भृतकमप्राक्षीत्-कस्याऽयमश्वः ? किङ्करः प्राह-यस्याऽहं किङ्करोऽस्मि, तस्यैव हयः । पुनरपि तेन पृष्टः-त्वं कस्य कर्मकरोऽसि ? सोऽवोचत्-यस्यैष हयः, इत्थं द्वित्रिवारं पृष्टस्तथैवोक्तवान् । ततो मनुजः प्राह—रे मन्द ! तव स्वामिनः काचित्संज्ञाऽस्ति नवेति भण, संज्ञां कुतो न ब्रूषे ? पुनः स उवाच तं प्रति भो आर्य ! इदानीं दन्तधावनं न कृतं, न च भुक्तं, तस्मात्तस्य नामोच्चारणं न श्रेयः । तच्छ्रुत्वा स उवाद-अरे ! त्वमनृतं वदसि, नैतद् विश्रम्भि वचः, यदि त्वं निजस्वामिनो नाम गृह्णीथास्तदा तुभ्यं मिष्टान्नं शष्कुलीश्च प्रयच्छेयम् । ततः स मिष्टान्नलिप्सया स्वस्वामिनो नामग्रहणायोद्यतोऽभवत्, मिष्टान्नञ्च वस्त्रेऽलात् । तदानीमेव तुरङ्गम उत्प्लुत्य पद्भ्यामताडयत्तम् । तेन सर्वा शष्कुली मोदकश्चेतस्ततो विकीर्णमभवत्, महद् व्यसनश्चान्वभूत् । एवं दुर्जनानां निष्पुण्यकृपणानाञ्च नाम्नि जिह्वाग्रे स्थिते सत्यपि विघ्नव्यूहा अवश्यमेव संभवन्ति । तस्मादीदृशानामधमकृपणशेखराणां नाम भोजनात्प्राग् नैव ग्राह्यं स्वकल्याणमिच्छद्भिर्जनैः ॥ ७३ ॥

**तथोक्तश्च-कृपणाख्यां न गृह्णीयात्, प्रत्यूषे तु कदापि न । चोक्तं लोभवशाद्येन, हतो घोटकलत्तया ॥ १ ॥**

**अथाऽन्यसत्त्वानां मांसमल्पमूल्येन लभ्यते तत्राऽभयकुमारस्य ७३-कथा—**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूपः पृच्छाति मांसमौल्यमनुगान् प्रोचुश्च तेऽल्पं सुतो-ऽनल्पं वक्त्यभयो निवारयति भोस्तं दर्शयामि प्रभो!।
गत्वा सर्वगृहे नृपाय हृदिजं तद्देहि नाऽऽप्तं पलं, ग्राह्यं लाहि धनं न तेन तदितो लात्वाऽर्पितं भूपतेः ॥७४॥

अथैकस्मिन् दिवसे श्रेणिकनृपः सदसि स्वसामन्तान् पप्रच्छ—भोः! किमद्यश्वो हीनमूल्यं वस्तु लभ्यते? ततस्ते प्रोचुः—राजन्! मांसमल्पमूल्येन प्राप्यते। तत्क्षण एव राजकुमारोऽभयः कथयामास—राजन्! मांसस्य महन्मूल्यं वर्तते। ततस्तत्पित्राऽभिहितं-त्वमर्भकोऽसि, मूल्यस्याऽल्पाऽनल्पत्वे किं वेत्सि? अभयकुमारः पुनरप्यूचे-नहि राजन्! अस्य निर्णयमल्पेष्वेव दिवसेषु प्रत्यक्षं कारयिष्यामि। पश्चादभयकुमारेण राजानं प्रत्युक्तम्—पितः! आमयच्छलेन भवता सौध एव स्थातव्यं, परिषदि च नाऽऽगन्तव्यम्। ततोऽभयेनाखिलेऽपि पत्तने पटह उद्घोषितः-श्रेणिकभूपो व्याधिपीडितोऽस्ति। तदाऽभयकुमारेण युक्त्या सर्वसामन्तगृहे गत्वा निवेदितम्—सामन्तहृन्मांसं नृपोऽश्नीयात्तदा निरामयो भवेदिति भिषग्भिर्गदितमस्ति, तस्माद्देवस्तन्मांसमिच्छति, भवन्तश्च पलं पलं छेदं छेदं निजहृन्मांसं ददतु। तन्निशम्य सर्वेऽपि मिथो मुखं वीक्षमाणाः प्रोचुः—नृपाङ्गज! यथेच्छं धनं प्रयच्छामः परं स्वात्माधारं मांसदानन्तु दुष्करमेव सर्वेषाम् जीवानां। पश्चादाग्रहेण तेभ्यो द्राविणं गृहीत्वा महीपतिमदर्शयदचकथच्च—स्वमांसाऽर्पणमसंभवि लोके परेषान्तु प्रयासमन्तरेण लभ्यमपि। तमुदन्तं श्रुत्वा समेऽपि सामन्तास्तूर्ष्णीं भूत्वा समुपाविशन् ॥७४॥
नृपः स्वात्मजगदितं वचनं युक्तियुक्तं विज्ञाय जगाद—

स्वमांसं दुर्लभं लोके, लक्षेणाऽपि न लभ्यते। अल्पमूल्येन लभ्येत, पलं परशरीरजम् ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथाऽभव्यजीवाः श्रीतीर्थंकरस्योपदेशेनाऽपि न भिद्यन्ते तत्र मुद्गशैलस्य ७४-कथा—

मेघं वक्ति च नारदस्तव रिपुर्मुद्गाख्यशैलो भुवि, श्रुत्वा कुप्यति सोऽणुकस्त्वमसि तं रे ! याहि मुद्गाऽऽगतः। कोऽग्रेऽयं मम वर्षति प्रबलकं भेत्तुं न मां शक्यते, वक्त्रे हास्यमतो दृषद्यदि तथाऽभव्यो जिनैर्भाषितः ।७५।

कदाचिन्नारदो मेघमुपेत्याऽत्रोचत्—मर्त्यलोके मुद्गशैलोऽतिकर्कशोऽस्ति मदोद्धतः स वक्ति-जगति मां भेत्तुं कोऽपि प्रभुर्न विद्यते । गर्वगर्भितं तद्वचो नारदाऽऽस्यान्निशम्य नीरदोऽपि साऽहंकारमाह—अरे ! तं त्वहमधुनैव जीर्णशीर्णं करोमि । एवमुक्तं पयोदवाक्यं श्रुत्वा देवर्षिर्नारदो मुद्गशैलमुपेत्योवाच—रे शैल ! त्वमितो झटिति प्रयाहि, तत्रोपरि जीमूतो भ्रूभङ्गभीषणः सन् त्वां प्लावयितुमायाति । तदाऽऽकर्ण्य मुद्गाचलः प्रतिवक्तुं लग्नः—हे देवर्षे ! वराकस्य जलधरस्य मम पुरः का शक्तिर्येन्मां प्लावयेदहन्तु विपुलशक्तिमानस्मि । एतावदुक्त्वा विरत एव तस्मिन् पुष्करावर्तकाद्याः प्रलयपयोदाः सप्तदिनानि यावन्मुसलाधारवृष्ट्या ववर्षुः, परं स शैलो मनागपि नाऽभिद्यत, प्रत्युत निर्णिक्तो विरजस्कः सन् श्वेततरः समजायत। ततः सर्वेऽपि हास्यतत्परा मनुजा वारिवाहं वीक्ष्य जहसुः । एवमेवाऽभव्याः प्राणिनोऽपि श्रीतीर्थङ्करस्य भवाब्धितरिनिभेनोपदेशेनाऽपि कदाचिदपि नाऽवबुध्यन्ते ।।७५।। ईदृशो भावो वीतरागेण श्रीजिनेन्द्रेणाऽपि भव्यजीवानां कल्याणार्थं प्रकटितोऽस्ति । तथोक्तञ्च—

मुद्गशैलो मुद्गमानः, पुष्करावर्त्तको घनः । जम्बूद्वीपप्रमाणोऽसौ, नारदः कलिकृत्तयोः ॥ १ ॥

अथार्यावर्तदेशे जनिं लब्ध्वा यो जनो धर्मं नाऽऽचरति स पशुरेव तत्र जडश्रेष्ठिनः ७५-कथा—



For Private and Personal Use Only

केन श्रेष्ठिजनेन हाटकमयी स्थाली गृहे कारिता, धृत्वा रूपकपीठके प्रतिदिनं तस्यां रजः क्षिप्यते ।
तद्वच्चार्यसुदेशजं नरवपुर्धर्मश्च लब्ध्वा जडा, मानुष्या यदि नाऽऽचरन्ति सुखदं मोक्षस्य कामे रताः ।।७६।।

अथ कश्चिज्जडः श्रेष्ठी स्वर्णस्थालं कारयामास। तद् रूपकपीठे संस्थाप्य तस्मिन्नहरहो रजोनिकरं विकिरति स्म, एतन्निदर्शनमात्रम्। प्रकृते तु यो नर आर्यावर्तविषये दुष्प्रापं जन्म प्राप्य निर्वाणपददातारं श्रीजिनमतं नाऽऽराधते, स हतभाग्य एव ज्ञेयः । यतो मानुषं जन्म सुवर्णप्रतिमं तत्प्राप्य येन धर्मो न सुविहितः स स्वर्णस्थाल्यां रजःप्रक्षेपकः श्रेष्ठीव स्वजन्म निष्फलमेव यापयति। ये कामोपभोगलम्पटा मूढधियस्ते धर्माऽऽचरणपराङ्मुखत्वेन नरकाऽवटे मुहुर्मुहुः पतिता न जातु शर्म समुपलभन्ते ।। ७६ ।।

दोहा–सोनाथाली मनुज–भव, पाप धूलिकण जोय । न करे ते नर जाणजो, मूर्ख शेठ सम होय ।।१।।

अथ जडमतिमूर्खवैद्योपरि ७६–कथा—

मृत्वा रोगहरो गतो दिवि यदा ज्ञात्वा स्वपुत्रं जडं, दत्ता तेन सुधा तदा जनकृते गच्छन्ति रोगाः समे ।
पीयूषैर्विशदं कृतं निजवपू राज्ञी गदैः पीडिता, राजा वक्ति निरामयं कुरु भिषङ्नो चेत्स निष्कासितः।।७७।।

कोऽपि भिषक् शुभध्यानेनेतः प्रेत्य व्यन्तरोऽभवत् । ततस्तस्य पुत्रो मूर्ख आसीत्, इति स व्यन्तरदेवः पुत्रस्नेहवशात् सूनवे सुधाकलशं प्रायच्छत् । ततः स सुधाप्रयोगेण सर्वानपि गदान्निवारयामास। एवमतिक्रामति काले तदात्मजः सुधया जगति विख्यातो जातः, प्रचुरं वित्तञ्चोपार्जयत् । एकस्मिन् दिवसे सुधाकुम्भं दास्याः सकाशादानाय्य स्ववपुः सर्वथा जीवनपर्यन्तं निरामयं कर्तुं सस्नौ ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ कदाचित्तद्ग्रामस्य राजमहिषी गदग्रस्ताऽभवत् । ततो भूपो भिषक्पुत्रमाहूय पप्रच्छ–भो वैद्यवर ! मम महिष्या रोगापनयनस्य त्वयि शक्तिश्चेद्विद्यते प्रयच्छौषधम् । तदाऽमृतव्ययाद् व्याधिनिवारणे स्वाऽशक्तिं विज्ञाय मदसाध्योऽयं रोगस्तथाऽमृताऽपव्ययवृत्तान्तं कथिते तन्मौढ्यात् सकोपेन राज्ञा स निजदेशाद् बहिष्कृतः । स चाऽविचारितकारी चिकित्सकचूडामणिरसह्यं दुःखमन्वभूत् । तथैवेदममृतसदृशं दुरापं नरत्वं प्राप्य ये जना वृथा गमयन्ति, ते दुःखभागिनो भवन्ति ॥ ७७ ॥ उक्तमपि—

अमृत घड़ो ते नरवपू, खोय अकारज ठाम । सकल जन्म ते हारिओ, मूर्ख वैद्य सम काम ॥१॥ अपि च–

स्वर्णस्थाले क्षिपति स रजः पादशौचं विधत्ते, पीयूषेण प्रवरकरिणं वाहयत्यैन्धभारम् ।
चिन्तारत्नं विकिरति कराद् वायसोड्डायनार्थं, यो दुष्प्रापं गमयति मुधा मर्त्यजन्म प्रमत्तः ॥१॥

अथ सरलजडबुद्धिशिष्योपरि ७७–कथा—

शिष्यान् वक्ति विलम्बिताः क हि गुरुः प्रोचुस्तु वीक्षामहे, तन्नाट्यं हि नटस्य भो ! जिनमते नैवेक्षणीयं कदा ।
सत्यं तेऽपि तथेति सद्गुरुतटं प्राप्तास्तदा कालके, नव्या चाऽपि कृतं न्यषेधि तदतो नाऽग्रे त्वया दृश्यताम् ॥ ७८ ॥

कस्मिंश्चिद्दिवसे गुरुः शिष्यानुवाच–यूयमेतावन्तं कालं क्काऽऽस्त ? तेष्वेको मुख्यशिष्य उक्तवान्–भगवन् ! मध्येवर्त्म नटा नृत्यन्ति स्म, तान् प्रेक्षितुं प्रवृत्तः । गुरुणोक्तम्–अस्मज्जैनशासने नाटकादिप्रेक्षणं प्रतिषिद्धमस्ति । तदा शिष्यस्तद्वचनमुरीकृत्य नाटकदर्शनं निन्द्यमिति मत्वाऽपि पुनः कतिपयैरेवाऽहोभिर्भिक्षां भिक्षितुं जगाम, तत्र विलम्बे जाते समागते च तस्मिन् भूयोऽपि गुरुणा पृष्टः–कस्माद्वि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रादागतोऽसि ? तदानीमपि शिष्यस्तथैवोत्तरं ददौ–गुरो ! अद्य नट्याः प्रयोगं निभालयितुं स्थित आसम् । तन्निशम्य गुरुरवादीत्–अरे मन्दबुद्धे ! मम पुरः पुरा त्वया नाटकविलोकनं परित्यक्तम्, पुनरत्र कथं स्थितोऽभूः ? तदा शिष्येणोक्तम्–आर्य ! मया तु नटस्य नाट्यं परित्यक्तमासीत्, न तु नट्याः । तदा गुरुणा पुनः प्रतिबोधितः–नटनट्योर्नाटकावलोकनेन सांसारिकमोहोत्पत्तिः कर्मबन्धश्च बोभूयते । ततः शिष्योऽपि नाट्यं स्त्रैणं पौंस्नं वा स्यान्न द्रष्टव्यमिति तद्दण्डं स्वीचकार ॥ ७८ ॥ कथितमपि—

निर्दम्भास्तु वरा मूर्खाः, साधवो ये भवन्ति ते । आलोचयन्ति गुर्वन्ते, यथा नाटकवीक्षकः ॥ १ ॥

अथ मूर्खपुत्रोपरि कस्यचित् श्रेष्ठिपुत्रस्य ७८–कथा—

दातव्यं पितरौ न वत्स ! कथितः प्रत्युत्तरं वै त्वया, गेहाद् द्वौ विगतौ तदा जडमतिर्द्वारं जटित्वा स्थितः ।
माताऽऽगत्य सुतं ब्रवीति बहुशो नोद्घाटयोद्घाटति, गेहे ह्युत्तरतः कृतं किमिह रे ! सोऽवग् युवाभ्यां मतम् ७९

कदाचित्केचिच्छ्रेष्ठिश्रेष्ठिन्यौ स्वसुतं शिक्षयतः–भोः पुत्र ! पितृभ्यां पुरो विनयेन वर्तितव्यं, जातु प्रत्युत्तरमपि न देयम् । पुत्रस्तयोर्वचनं स्वीचकार, परं स बटुर्जडमतिरासीत्, इति तद्वचनाऽभिप्रायमज्ञात्वा मनसि निदधौ । पश्चादेकस्मिन् दिवसे तज्जननीजनकौ कार्यवशाद् बहिर्गतौ । तदा स मन्दमतिर्बालोऽभ्यन्तरतः कपाटौ पिधाय गृहे स्थितः । यदा तौ परावृत्याऽऽगतौ पुत्रमूचतुः– हे पुत्र ! कपाटमुद्घाटय २, एवं बहुकार्थितोऽपि स बालिशोऽररं नोद्घाटयन्न च प्रतिवचनमेव ददौ । ततो हताशौ भूत्वा छदिमुत्पाट्याऽन्तः प्रविष्टावपश्यतां हसन्तं बालकम् । ततः पितृभ्यां भाषितम्- अरे मूढ ! जानन्नपि कपाटं कथं

For Private and Personal Use Only

नोद्घाटितवान् न चोत्तरं दत्तवान् ? ततस्तेनाऽभाणि–पितरौ ! भवद्भ्यामेव मह्यं शिक्षा दत्ता–मातापित्रोः पुरः कदापि किञ्चिदपि न वक्तव्यम्, तस्मादेव मया भवदाज्ञाभंगदोषभयात् प्रत्युत्तरं न दत्तम् ॥ ७९ ॥ एषोऽविनीतपुत्रस्य दृष्टान्तः । उक्तञ्च—

जडोऽपि वक्रगश्चैव, यो भवेद् भुवि मानवः । श्लाघ्यते नैव लोके स, यथाऽभूत् श्रेष्ठिनन्दनः ॥१॥

अथ सुपात्रदानं निष्फलं न याति तत्र ७९–कथा—

श्वाशुर्ये पथि गच्छता जिनमुनेः कृत्वाऽष्टमं पारणं, पश्चात्स्वेष्टगृहे गतो हि गृहपं ज्ञात्वा वृषं देव्यवक् ।
लाहि त्वं प्रचुरं न गेहचलितो लात्वोपलान्नैर्झरान्, रत्नान्याशु कृतानि वीक्ष्य गृहिणी पित्रा तु रम्यं कृतम् ॥८०॥

एकदा कश्चिन्निःस्वो जामाता श्वशुरालये धनलिप्सया पत्न्या प्रेरितः प्रस्थितः । सोऽध्वनि मिलितं कृताऽऽष्टाह्निकतपसं साधुं निजसंबलेन पारणं कारयित्वा श्वशुरगृहाऽभिमुखं चलितः । अत्राऽन्तरे तत्श्वशुरकुलदेव्या तस्य श्वशुरं प्रत्युक्तम्–तव जामाता दारिद्र्यपीडितो वित्तार्थी त्वद्गृहे समेति, परं तेन मार्गमध्ये यो धर्मः कृतस्तं तुभ्यं दद्यात्तर्हि तस्मै धनं प्रदेयम् । एतावत्येव जामाता तद्गृहमुपागतः । तदा श्वशुरेणाऽभिहितम्—यत्त्वया वर्त्मनि पुण्यं कृतं तन्मह्यं प्रयच्छ, प्रतिफले च धनं गृहाण । परं जामाता तद्धर्मफलं नाऽदात्, परावृत्तश्च रिक्तकर एव निजगृहं प्रति, मार्गे सरितो मध्याद् दृषदः संचित्य पेटिकायां धृत्वा मस्तके संस्थाप्य स्वसदनाऽभिमुखं प्रतस्थे । तस्यां वेलायां मुनितपोऽधिष्ठायकदेवेन शर्करा रत्नानि चक्रिरे । गृहाऽऽगतस्य तस्य पेटिका स्त्रिया समुद्घाट्य विलोकिता, बहुरत्नानि चाऽपश्यत्सा । ततः सा बभाण–स्वामिन् ! मत्पित्रा परमोपकारः कृतो येन तुभ्यमियद्धनमर्पितम् ।



For Private and Personal Use Only

तदा जामात्रा रत्नानि विलोक्य ज्ञातम्–मार्गे मया यो दानधर्मः कृतः–सुभावेन साधवेऽन्नं दत्तम्, तत्पुण्यप्रकर्षेण सर्वमेतत्फलितम्. पश्चात्कृत्स्नमपि वृत्तं याथातथ्येन स्वकलत्राय निवेदितम् ॥ ८० ॥ तस्मात्काले दत्तं सुपात्रदानं किं किं न सूते ? गदितश्च—

धर्मथकी धन संपजे, धर्मे शिवसुख थाय । कंकर पण रत्न ज कियाँ, देवे धर्मपसाय ॥ १ ॥

धम्मेण कुलप्पसूई, धम्मेण य दिव्वरूवसंपत्ती। धम्मेण धणसमिद्धी, धम्मेण सुवित्थरा कित्ती ॥ २ ॥

अथाऽसंभवं नैव संभवति तत्र ८०–कथा—

श्रेष्ठ्यंघ्रौ यदि कंटकं हि निशितं भग्नं तदा सेवकान्, गृह्णीताह वणिक्स चर्म बहुलं धीमान् किमर्थं तदा ?। भूम्याच्छादनहेतवे परपदत्राणाय तं नाऽधुना, भूतं नैव भविष्यतीति किमु भोस्ते पादरक्षां कुरु ॥ ८१ ॥

कस्याऽपि मन्दमतेः श्रेष्ठिनः पादे तीक्ष्णं कण्टकं विद्धम् । तेन स दुःखीभूय सेवकानुक्तवान्–यतस्ततो यावन्ति चर्माणि समुपलभ्यन्ते तावन्ति सर्वाणि समानेयानि, तत्र समर्घमहार्घयोश्चिन्ता न विधेया। तच्छ्रुत्वा कश्चिद्धीमानिभ्यमवोचत्–भोः श्रेष्ठिन् ! इयच्चर्म गृहीत्वा किं विधित्ससि ? निकृष्टो व्यवसाय एषः । तदा धनिना जल्पितम्–धीमन् ! मम चरणे कंटकं लग्नं भग्नश्च तत्पीडितोऽहं सर्वजनहिताय समस्तक्षोणीं चर्मपरिवृतां कारयिष्यामि, येन सर्वेऽपि कण्टकाऽऽर्तिविरहिता भवेयुः । तन्निशम्य कोविदोऽवक्–नेदृशं कार्यं कदाचिद् भूतं भविष्यति वा, तस्मान्मौढ्यपरीतममुं विचारं जहीहि, उपानहं कारयित्वा चरणं परिरक्ष ॥ ८१ ॥ उक्तश्च—

चरणे कण्टके भग्ने, श्रेष्ठिना चिन्तितं तदा । आच्छाद्या चर्मभिः पृथ्वी, सर्वरक्षणहेतवे ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दोहा—अणहुंती कीजे नही, कीजे होय सुजाण । शेठने पण्डित बोलियो, तव समज्यो ते जाण ॥ २ ॥

अथ सत्सु सतामुपदेशः शीघ्रं फलति तत्र ८१– कथा—

राज्यं धर्मरुचिं ददौ न च ललौ गच्छामि पित्रा समं, भूत्वा तापसकौ गतौ यदि वनेऽमावास्यकायामवक् ।
छेत्तव्यं नहि पत्रकादिकमृषिं दृष्ट्वा सुधर्मेच्छुको, रक्ष्यं त्वेकदिनं च सोऽनिशमहं श्रुत्वा प्रबुद्धस्तदा ॥८२॥

कदाचिज्जितशत्रुनामा नृपतिः स्वकीयं राज्यं धर्मरुचिनाम्ने स्वपुत्राय ददौ, स्वस्य च तापसत्वाङ्गीकरणं प्रकटीचकार । तदा राज्यमगृह्णता पुत्रेणोक्तम्—पितः ! अहमपि त्वया सहैवागमिष्यामि, तत्र च सहैव तपश्चरिष्यामि । पश्चात् पितापुत्रावुभावपि वने गत्वा तपश्चेरतुः । अथैकदाऽमावास्यादिवसे ज्येष्ठेन मुनिना कनिष्ठं प्रत्युक्तम्—अद्याऽमावास्येति पुष्पफलादिकं न त्रोटनीयम्, तन्निशम्य धर्मरुचिरितस्ततः परिक्रामन्नरण्ये साधुमेकं ददर्श, तमभ्युपेत्य चाऽवोचत्—भगवन् ! अद्यामावस्येति भवान् पुष्पफलादिकं न छेत्स्यति किमु ? तदाऽऽकर्ण्य मुनिनाऽप्यभाणि—अङ्ग ! अस्माकं सर्वदैव फलादित्रोटनस्याऽनध्यायः । तत्सदुपदेशं श्रुत्वा धर्मरुचिर्जातिस्मृतिं प्राप्तः । ततःप्रभृति तेन पापभीरुणा धर्मरुचिनापि फलपुष्पादित्रोटनप्रत्याख्यानं त्रिविधेन विदधे ॥ ८२ ॥

उक्तश्च—गुरूपदेशतो धर्मं, केचिज्जानन्ति मानवाः । अन्ये धर्मरुचेस्तुल्यं, जातिस्मरणज्ञानतः ॥ १ ॥

अथ मनसः सुपरिणामेन प्राप्तकेवलज्ञानस्य प्रसन्नचन्द्रराजर्षेः ८२–कथा–

नत्वाऽपृच्छदृषिर्गमिष्यति नृपो वीरं क मृत्वा प्रभो !, सोऽवक्तं ह्यधुनैव सप्तमभुवो हेतोः कुतो ? हृद्रणात् ।
पश्चादाशु पुनः स्वराद्यचरमे देवाः क यान्त्युत्सवे, लब्धं तेन च केवलं जिनवचः श्रुत्वैति शं श्रेणिकः ॥८३॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकदा श्रेणिकनृपः श्रीमहावीरप्रभुं वन्दित्वा पप्रच्छ- भगवन् ! राजा प्रसन्नचन्द्रो दीक्षामादाय वने कायोत्सर्गध्याने सूर्याऽभिमुखं पश्यन्नेकेन चरणेन स्थितोऽस्ति, तस्माद्यदि साम्प्रतं म्रियेत, तर्हि कस्यां गतौ जायेत ? भगवता प्रोक्तम्-प्रथमनरकतः सप्तमं यावद् गमिष्यति । ततः पुनरपि श्रेणिको जगाद-प्रभो ! यद्येतादृशस्तपस्वी नरकं व्रजेत्तदा धर्माचरणं कः करिष्यति ? एतन्निशम्य भगवताऽभिहितम्-तस्य मानसिकः संग्रामस्तं नरके नेष्यति। क्षणान्तरे श्रेणिकः पुनरप्राक्षीत्- भगवन् ! यदीदानीं प्रसन्नचन्द्रराजर्षिर्म्रियेत, तदा कां गतिं लभेत ? भगवता पुनरप्यभाणि-प्रथमदेवलोकादारभ्य पञ्चममनुत्तरविमानं यावत्तस्य गतिः स्यात् । अत्राऽन्तरे भगवतः समवसरणाद्देवा गन्तुमुद्यता बभूवुः, तदानीं श्रेणिकोऽपृच्छद् भगवन्तम्-भगवन् ! एते देवाः कुत्र गच्छन्ति ? तदा भगवता व्याहृतम्- प्रसन्नचन्द्रराजर्षेः केवलज्ञानमुद्भूतमस्ति, तदुत्सवं विधातुमेते व्रजन्ति । तदा राज्ञा मनसि ध्यातम्-अधुनैव भगवता तस्य नरकगमनं भाषितं,पुनरिदानीं केवलज्ञानमिति विरुद्धमिवाभाति तथापि भगवतो वचनं त्वन्यथा न भवितव्यम्, विपरीतमपि न संभवेत्, निराधारमपि वक्तुं न शक्यम्, इत्थं संदिहानस्तमपनेतुं भगवन्तं पप्रच्छ। ततः प्रभुरवदत्-प्रथमं यन्मयोक्तं यन्नरके गमिष्यति, तत्तव दुर्मुखसुमुखनाम्नोर्दूतयोर्वचो निशम्य मनोयुद्धे प्रवर्तमान आसीत्प्रसन्नचन्द्रराजर्षिस्तस्मान्नरकगमनार्होऽभवत्, परं स मनोयुद्धं कुर्वन् सर्वमस्त्रजातं परित्यज्य शिरोवेष्टनोत्तारणार्थं शिरसि हस्तं न्याक्षिपत्तदा लुञ्चितं शिरो निभाल्य व्रीडितो विचारितुं लग्नः-क एष दुर्विलासः? अहन्तु दीक्षितोऽस्मि, क्व एते रजःपरिणामाः पुत्रादयः ? कः कस्य पुत्रः ? कः संग्रामः ? कस्य दुर्गः ? कस्य केन संग्रामोऽनित्यैषा क्षणभंगुरी मनोभावनाऽनिशं दुःखोदधौ निमज्जनोन्मज्जने कारयति जीवानस्मान्,इत्थमभेदभावं भावयतस्तस्य कैवल्यं समुत्पन्नम् । तदेतदाश्चर्यकरमलोकसामान्यं वृत्तं श्रुत्वा श्रेणिकस्तुतोष ॥ ८३ ॥ उक्तमपि—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सप्तमायुर्दलं कृत्वा, प्रसन्नेन्दुर्नृपो यथा। संक्षिप्य तद्धृदा सद्यः, केवलं लब्धवान् द्रुतम् ॥१॥ अपि च—
मन एव मनुष्याणां, कारणं बन्धमोक्षयोः। सप्तमे नरके याति, जीवस्तन्दुलमत्स्यवत् ॥ २ ॥
मनसैव कृतं पापं, न शरीरकृतं कृतम्। यथा ह्यालिंगिता कान्ता, तथैवाऽऽलिंगिता सुता ॥ ३ ॥

अथ मूर्खः स्वदोषं न पश्यति तत्र ८३-कथा—

लिप्त्वोर्वी रविमर्चयत्यविरतं कल्येऽबला गोविटा, विड्युक्तेन किलैकदा च कुरुते नत्वाऽर्चनं वा रवेः।
नासाऽग्रे करयुग्ममेत्य दिवसे दुर्गन्धमायाति सा, हाऽयं गूथमयः खगोदय इतोऽभूत्स्वाऽगुणोऽज्ञायि नो ॥८४॥

अथ काचिद्योषिदहरहो गोमयेन भूमिं लिप्त्वा सूर्याऽभिमुखं कराञ्जलिं बध्वा साष्टांगं भानुं प्रणमति स्म। एवं प्रत्यहं कुर्वती त्वयैकस्मिन्दिने रात्र्यवसाने गोमयस्थाने विष्ठा हस्ते समुपागता, तया गृहं संलिप्य दिनकरं प्रणमत्याः करौ नासाग्रमुपागतौ तद्दुर्गन्धितो दुर्मनायमाना प्रभाकरमदूषयत्, हा! किमद्य विण्मयः समुदितः पपीः? प्रत्यहं सेवितस्याऽपि पापस्य समक्षतो दौर्गन्ध्यमेवाऽऽयाति, एवं सा भानुमेवाऽशपत, परं स्वाऽत्रगुणं न बुबोध। इत्थं लोके मन्दा महात्मानमेव द्विषन्ति, स्वच्छिद्रञ्च न विदन्ति ॥८४॥ पठ्यतेऽपि—कर्मणां दीयते दोषो, न दोषो दीयते स्वके यथैकया पुरा दत्तः, सूर्यस्य सूर्यभक्तया ॥१॥

अथ नीचैः सह प्रतिब्रुवन् महानपि नीचतामेति तत्र ८४-कथा—

कृत्वोत्सर्गमलं शिलोपरि मुनिस्तस्थौ हि निर्णेजको, वक्त्यागत्य विमुञ्चतां पटशुचिं कुर्वे ततो भाषणम्।
दूरे तेन कृतस्तदर्षिरजकौ लग्नौ मिथो नाऽन्तरं, निर्ग्रन्थस्य च तस्य देवि! न हि मां त्वं रक्ष जाने मुनिम् ॥८५॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथैकदा नदीतीरे शिलोपरि कायोत्सर्गध्याने कोऽपि तपस्वी यतिः स्थित आसीत्। अत्राऽन्तरे कोऽपि राजनिर्णेजको वस्त्रप्रक्षालनार्थं तत्राऽऽगात्, साधुश्चाऽवदत्–हे मुने ! इतो दूरमपसर, अत्राऽहं नृपवासांसि प्रक्षालयिष्यामि, परं मुनिर्ध्यानलीनस्तूष्णीमेव स्थितोऽभूत्। अथो रजको रोषेण मुनिं भूमाववपातयत्। ततो मुनिरपि क्रोधवशतस्तेन सह योद्धुं लग्नः। इत्थमुभावपि मिथो बाहूबाहवि चक्रतुः। तदा प्राप्ताऽभिषङ्गो मुनिः शासनदेवतामधीयन्नुवाच–हे देवि ! त्रायस्व मां दुष्टादस्मात्। ततो देवताऽऽविर्भूयाऽवक्–कमहं त्राये ? कतरोऽनयोः साधुरिति विस्पष्टं न वेद्मि ॥ ८५ ॥ उक्तञ्च—

कुत्र याताऽसि भो देवि !, तदा देव्यवदन्मुनिम्। निर्णेजके मुनौ चापि, भेदो न ज्ञायतेऽधुना ॥ १ ॥
को यती रजकः को वा ?, संतोषः पोषवाञ्छकः। कः पूज्यो वा ह्यपूज्योऽस्ती–त्येवं भेदो न दृश्यते ॥ २ ॥

## अथ बुद्धिपरीक्षाविषये राजमन्त्रिणः ८६–कथा—

भूपोऽमात्यमवोचदानय पुरात्त्वं त्वब्धिसंख्यानि किं?,चास्त्यस्त्यादिममस्ति नास्त्यवरकं नास्त्यस्ति नास्तीतरः।
नास्ति श्रेष्ठिपणाङ्गने मुनिवरो व्याधो नृपं दर्शिता,–स्तान्वीक्ष्याऽऽह किमत्र चाऽपरभवे द्रष्टव्यमेतत्खलु ॥८६॥

कश्चिद् भूपालः स्वाऽमात्यं वक्ति–नगरमध्याच्चत्वारि वस्तूनि समानय। मन्त्रिणि नाम सुपृष्टे सति नृपः प्रहेलिकारूपेणोवाच–एकं वस्तु इह भवे परत्र चाऽप्यस्ति, अपरमिहैवाऽस्ति न परभवे, तृतीयमिह नाऽस्ति परत्राऽस्ति, तुरीयमिह परत्राऽपि च नाऽस्ति। तदनन्तरं सचिवः श्रेष्ठिनं, पण्यस्त्रियं, साधुं, व्याधञ्चानीय नृपतिं दर्शयामास। उक्तांश्च–भवत्प्रश्नाऽनुरूपाणीमानि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चत्वारि वस्तूनि समुपस्थापितानि । राज्ञा पृष्टं-कथम् ? मन्त्री कथयति-एषु श्रेष्ठी इह सुखमनुभवत्येव, धर्माचरणाच्च परलोकेऽपि सौख्यमनुभविष्यति । परा पणाङ्गनाऽत्र वाञ्छितविलासपरिपूर्णा परलोके चाऽनिष्टभागिनी भविष्यति । तृतीयः साधुरिह शरीर-क्लेशमाप्नोति धर्माऽऽचरणाच्च परभवे परमाऽऽनन्दमाप्स्यति । चतुर्थो व्याधस्तस्योभयत्राऽप्यसुखमेव विद्यते ॥ ८६ ॥ उक्तश्च—

सचिवस्य परीक्षायै, राज्ञा कथितमानय, समस्यत्राऽत्र चत्वारि, शीघ्रं वस्तूनि मे पुरात् ॥ १ ॥ अपि च—

दोहा—सचिव—सुबुद्धी समझिने, आणी वस्तु ज चार । इह भव परभव कारणे, सुख दुख तणो विचार ।२।

अथ कटुवचनमपि पथ्यं तथ्यश्च भवति तत्र ८७—दृष्टान्तः—

वीरान्ते परिवारयुक्तनृपतिं दृष्ट्वा सुरो जल्पति, वीर ! त्वं हि म्रियस्व जीव नृपते ! जीवाऽभय ! त्वं न वा । मा त्वं कालिक जीव रे! नृप इति श्रुत्वा सकोपोऽभवद्, वीरोऽहं ह्यमृतेऽसुखी दिवि वृषे पापे त्वधो यास्यति ॥८७॥

एकदा श्रीमहावीरस्वामिनमभिवाद्य तत्समीपे सकुटुम्बं निषण्णं श्रेणिकराजं विलोक्य सम्यक्त्वदृष्टिः कश्चिद्देवो जगाद-भो वीर ! त्वं म्रियस्व, ततः श्रेणिकनृपमूचे-हे भूप ! त्वं दीर्घायुर्भव, अभयकुमारमप्यवदत्- त्वं जीव, म्रियस्व वा यथाकामस्ते, पार्श्वे स्थितं पापिष्ठं कालिकसूरियाभिधानं सौनिकश्चाऽवोचत-त्वं मा म्रियस्व मा च जीव । एतदाऽऽकर्ण्य समन्युः श्रेणिको वक्तुमुपचक्रमे-क एष मिथ्यात्विदेवोऽस्ति ? तदा भगवान् कथयति-एष दृढसम्यक्त्वदृष्टिदेवोऽस्ति । ततो राजा पप्रच्छ-कस्मादेष भवन्तं म्रियस्वेति कुत्सितं भाषते ? ततो भगवान् विशदयति-हे राजन् ! यन्मामवोचत्त्वं म्रियस्वेति, तस्याऽयमभिप्रायो यत्त्वं मृत्वा मोक्षसुखमाप्स्यसि । त्वां प्रति त्वं जीवेत्युक्तं तस्येदं कारणं त्वं मृत्वा नरके यास्यसि, तस्माद्यावज्जीविष्यसि तावदेव ते शर्म । अभयकुमारमपि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यत्त्वं जीव म्रियस्व वा यथा तवेच्छेति यदुक्तं तस्याऽयमाशयः—प्रेत्य त्वं देवलोके यास्यसि, जीवंश्च धर्मशतानि शुभकार्याणि करिष्यसि। कालिकसूरिं सौनिकं प्रत्यपि त्वं मा म्रियस्व मा च प्राणेति यत्कथितं तस्येदमाकूतम्—यज्जीवन् प्रत्यहं पञ्चशतमहिषान् हनिष्यसि मृत्वा च नरके गमिष्यसि, तस्मान्मा जीव मा म्रियस्व च, एवमस्य वाक्यार्थो विज्ञेयः। अनेन साधु गदितं, अतः समेषां शुभचिन्तकोऽयमिति जानीहि ॥ ८८ ॥ उक्तमपि—

श्रीमद्वीरजिनादीनां, चतुर्णां सदसि स्थितः। देवेनाऽनिष्टमिष्टं त–चोक्तं श्रुत्वा स कोपितः ॥ १ ॥
भूपस्तदा जिनेनोक्तः, सत्योक्तं सत्यवाग्यसौ। शुभेच्छुकः सुवक्ता चा–ऽस्मदादीनां विशेषतः ॥ २ ॥

अथ स्त्रीचरित्रमधिकृत्य भर्तृहरेः ८७—कथा—

भर्त्रीशाय ददौ द्विजोऽमरफलं तेनापि दत्तं स्त्रियै, साऽदाद्धस्तिपकाय सोऽपि गणिकां साऽदाच्च राज्ञे तदा ।
पृष्टानुक्रमतः प्रिया निगदितं तथ्यं तया साध्वसात्, त्यक्त्वा राज्यपदं भवं हि धिगरं दीक्षां विरागाल्ललौ ॥८८॥

एकदा भर्तृहरिनाम्ने नृपाय केनचिद् भूदेवेनाऽमृतफलं प्रदत्तम्। तच्च पिंगलाभिधायै प्राणवल्लभायै राज्ञा दत्तम्। सापि हस्तिपकाय स्वप्राणवल्लभाय जारपुरुषाय प्रादात्, अथ तेनाऽपि प्रेयस्यै गणिकायै दत्तम्। पुनर्वेश्यापि महोत्तमं फलं मत्वा सर्वहितैषिणे राज्ञे समर्पितवती। तन्निभाल्योपलक्ष्य च विसिष्मिये भूजानिः। ततो भूपो गणिकां पप्रच्छ–कुतस्त्वयाऽऽसादितमेतत्? ततः सा प्रकाशमाधोरणस्य नाम जग्राह। अथ सोऽपि भूपतिना पृष्टो नाऽहं वेद्मि कुतो लब्धमिति जगौ, पुनर्भूपभयेन वेपमानो यथातथ्यमचकथत्–भवन्महिष्या पिंगलया मह्यं खादितुमर्पितम्। मया च स्वप्रियायै गणिकायै प्रदत्तं तया भवते। तन्निशम्य राजा चिन्तयामास—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यां चिन्तयामि सततं मयि सा विरक्ता, साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ।
अस्मत्कृते च परितुष्यति काचिदन्या, धिक् तां च तं च मदनं च इमां च मां च ॥ १ ॥

अहो ! स्वार्थपरायणः खलु संसारः, आत्ममोहनं राज्यम्, पुत्रकलत्रादयो व्याधय इवातिक्लेशजनकाः, एवमनेकधा संसारासारतां विमृश्य प्राज्यं राज्यं त्यक्त्वा वैराग्योदयाद्योगमास्थाय क्षान्तिमादृत्याऽऽत्मानं संसाध्य तपस्वी भूत्वा दुश्चरं तपश्चकार ।

यतः—भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला, आयुर्वायुविघट्टिताभ्रपटलीलीलाम्बुवद्भंगुरम् ।
लोला यौवनलालसास्तनुभृतामित्याकलय्य द्रुतं, योगे धैर्यसमाधिसिद्धिसुलभे बुद्धिं विदध्वं बुधाः ! ॥ १ ॥

अथ दुराग्रहान्मरणं भवति तदुपरि कस्यचिन्मूर्खस्य ८८-कथा—

भुक्त्वाऽन्नं परमन्दिरे रसयुतश्चाऽऽगात्ततः स्वालय-मन्येद्युर्निजकामिनीं कथितवान्नाऽद्मि प्रिये ! तेऽन्नकम् ।
साऽवक्कारणमस्ति किं ? निगदितो यस्मिन्नपूपादिकं, जग्धं तेन कथं च नीरसमिदं भोक्ष्ये कदन्नं ? मृतः ॥ ८९ ॥

एकस्मिन्पुरे कश्चिन्मूर्खः परगृहे खाद्यकमोदककुंडलिकादीनि मिष्टभोज्यानि भुक्त्वा स्वाऽऽलयमागात्। पुनरागामिनि दिवसे स्वसद्मनि जेमनवेलायां भार्यया समेत्योक्तम्—स्वामिन् ! सम्पन्ना रसवती शीघ्रं भुंक्ताम् । ततस्तेनोक्तम्-मिष्टान्नं भवेत्तर्हि भोक्तुं व्रजानि । स्त्रियाऽभाणि-निजनिकेतने तु सामान्यमन्नपानं मिलिष्यति, मिष्टान्नन्तु भोज्ये कदाचिन्निमन्त्रणे तु सामान्यमन्नपानं मिलिष्यति, मिष्टान्नन्तु भोज्ये कदाचिन्निमज्जति । तथापि तेनोक्तम्—मम तु यदा मिष्टान्नं मिलिष्यति तदैवाऽत्स्यामि, यतो येनाऽऽस्येन सद्भोजनानि भुक्तानि, तेन रुक्षमन्धः कथं भोक्ष्ये । पश्चात्तस्य



For Private and Personal Use Only

दुराग्रहं ज्ञात्वा प्रातिवेश्मिकाः परिवाराश्च संबोधनार्थमागतास्तं सम्बोधयामासुः—यदि जीविष्यसि तदा बहुधा मिष्टान्नानि खादिष्यसि, अथ कदाग्रहाद् यद्युपवासेन जीवनं त्यक्ष्यसि, तदा कुतः परमान्नं भोक्ष्यसे ? परमित्थं बहुबोधितोऽपि स मूढो न बुबोध चाऽन्तेऽनशनं कृत्वा पञ्चत्वं गतो दुर्गतिमाप। अत्राऽयं परमार्थः—अस्य नियमपरिपालनन्तु वरं परं तस्मिन् कदाग्रहो न हितकारकः, तथा हे भव्याः! धर्मेऽपि कदाग्रहं मुक्त्वैव नियमपरिपालनं श्रेयस्करमिति वित्त ॥ ८९ ॥ तथा कथितमपि—

येनाऽऽस्येन सुमिष्टान्नं, भक्षितं मयकाऽबले ! । तस्मिंस्तु वदने भोज्यं, कथमद्य रसोज्झितम् ? ॥ १ ॥
एवं भव्यत्वयुक्तोऽपि, कदाग्रहयुतो नरः । अन्ते संवरप्राप्तोऽपि, दुःखभागी भवेद् ध्रुवम् ॥ २ ॥

अथ हंसकाकबकसदृशेषु साधुषु ८९—कथा—

गोचर्यां क गृहे गतेन मुनिना नाऽन्नं गृहीतं ततो—ऽन्येनाऽऽनिन्दित आदिमोऽपरमुनिं पप्रच्छ किं वो वृषम् ।
गेहेशा सरला त्रिधा वदति तां हंसैकदक्षवत्, हंसाभः प्रथमः परस्तु बलिभुक्तुल्यो बकाभोऽप्यहम् ॥९०॥

एकदा कश्चिन्मुनिः कस्याऽपि गृहे भिक्षितुं गतः, तद्गृहस्वामिनी गोचरीं दातुमुद्यता बभूव । तदानीं तस्या अशुचि शङ्कमानो गोचरीमगृहीत्वैव स ततः परावृत्ते। ततोऽपरः साधुर्भिक्षितुमागमत्, निश्शंकश्च भक्तमग्रहीत् । ततो भिक्षादात्री तमप्राक्षीत्—प्रथमो मुनिरन्नमनादायैवाऽव्रजत्तस्य किं कारणम् ? ततो मुनिरब्रवीत्—स वञ्चको भविष्यति, एवं तं विनिन्द्य गतः । क्षणाऽन्तरे पुनस्तृतीयः साधुः समागतस्तमपि गोचरीदानान्ते सा पृष्टवती—हे साधो ! कीदृश एष वो धर्मो यत्प्रथमो भिक्षामलात्वैव, द्वितीयस्तु भिक्षां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नीत्वा प्रथमं च निन्दित्वा जगाम। ततस्तृतीयस्तत्कारणमवदत्—हे भद्रे! अत्र जिनशासने त्रिविधाः साधवो भवन्ति, तेषु प्रथमो हंससन्निभः, द्वितीयो वायससमः, तृतीयोऽहन्तु बकसंकाशः स्वोदरंभरिरस्मि ॥ ९० ॥ शास्त्रेऽप्युक्तश्च—

चक्रांगकाकबकरूपधरा विचित्राः, सन्त्यत्र शासनबले मुनयो बलेन।
अन्तर्बहिर्विशदभावयुता मलीना, अन्तर्बहिर्न विशदो न सितश्च मादृक् ॥ १ ॥

यो मानवो नरत्वं प्राप्य धर्मकार्यात्प्रमाद्यति स पश्चात्तप्यते तत्र ९०—कथा—

निःस्वो जातु नृपस्य पर्षदि गतो राज्ञा तु तस्मै वरो, दत्तो लाहि गृहाद्यदीच्छसि धनं गेहे गतोऽवक् स्त्रियम्।
तं साप्यानय खादयामि पुरतो भुक्त्वा प्रसुप्तस्तदो,—त्याप्याप्रैष्यत नाट्यमैक्षत ततस्तन्नाप्तमस्ते रवौ ॥९१॥

क्वापि पत्तने कश्चिदाजन्मदरिद्री द्विजो राजपरिषदि स्वं याचितुं गतस्तदा राज्ञा पृष्टः सोऽवक्—अहमाजन्मदरिद्री विप्रोऽस्मि। तदा भूपस्तस्मै सत्कृपया वरं ददौ—अद्य सूर्योदयादारभ्याऽऽसूर्यास्तं मदीयकोशागारतो यावद्वित्तं ग्रहीतुमिच्छसि तावदाहर। एवं महीशवचनं श्रुत्वा स बालिशः स्वभार्यां प्रष्टुं गृहमागतः, आगत्य च राजवार्ता तस्याः पुरो न्यवेदयत्। तदा तत्पत्नी प्राह—स्वामिन्! क्षिप्रमेवाऽऽनीयताम्, सोऽधनोऽवदत्—प्रिये! भुक्त्वा यास्यामि यतः—शतं विहाय भोक्तव्यम्। ततः स्त्रिया धनलिप्सया द्रुतमेव रसवती कृता, ततोऽपि स दुर्भाग्यशेखरो भुक्त्वा जगाद—प्रिये! किञ्चिद् विश्रम्य गमिष्यामि, यतः—भुक्त्वा शतपदं गच्छेद्यदि शय्या न लभ्यते। एवमुक्त्वा गाढं सुप्तः, ततो योषिताऽतिप्रबोधितः प्रस्थितो मार्गे नाटकं वीक्षितुं स्थितः, तावद्भानुरपि तद्भाग्येन स्वरश्मीन् संजहार। पश्चात्स दरिद्री तत्र गतो भाण्डागारिकं च बहुप्रार्थयामास तथापि समयातिक्रमात्तेन न्यक्कृतः, पश्चात्तापमुपगतोऽपि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्प्राप्तुं यथा प्रभुर्नाऽभवत्तथा यो जनो दुरापं नरत्वं संप्राप्य प्रमादवशेन धर्मं नाऽऽचरति सोऽन्ते भाग्यरहितो विप्रदरिद्रीव दुःखी भवन्नतिक्लिश्यति ॥ ९१ ॥ तथाह-

नृजन्म दुर्लभं प्राप्य, ये धर्मं नाऽऽचरन्त्यथ । ते भाग्यहीनवन्मूढाः, शोकमेति भवाऽवटे ॥ १ ॥<br>
राज्ञोक्तं मूढ ! लाहि त्वं, श्रीगृहात्स्वं तवेच्छया । नाऽऽदात्प्रमादतो मूढो, धर्मेऽप्येवंविधो मतः ॥ २ ॥<br>
राजा जिनेश्वरो ह्यत्र, नृभवः कमलागृहम् । द्रव्यं दानादिकं ज्ञेयं, मार्तण्डश्चायुरेव हे ! ॥ ३ ॥<br>
विषयादिषु ये सक्ता-स्तथास्मिन् कौतुकादिषु । ते हारयन्ति सर्वस्वं मानवा मोहयन्त्रिताः ॥ ४ ॥

अथ भव्यपुरुषस्य स्तोकोऽपि नियमः फलदो भवति तत्र वंकचूलस्य ९१—कथा—

क्रोधः स्याद्यदि पृष्ठसप्तकपदं देयं गृहीतं व्रतं, गेहे भूरिदिनात्समागतपतिस्तल्पे स्वपुत्रस्त्रियौ ।<br>
सुप्तौ वीक्ष्य वधाय पृष्ठचलितः पुत्रस्तदा बोधितो, मातर्वक्ति हि सोऽपि हन्ति वचनं श्रुत्वा प्रशान्तोऽभवत्॥९२॥

कदाचिद् भद्रो नृपपुत्रो वंकचूलो गुरुमुखाद्देशनां श्रुत्वा व्रतं जग्राह—यदा कस्याऽप्युपरि कोपः समुत्पद्येत, तदा सप्तपदानि पृष्ठतो गत्वा पुनरभ्येत्य मानवोपरि प्रहारः करणीयः । एवं नियम्य विदेशं जगाम, पुनश्चिरकालेन स्वदेशं परावर्तिष्ट । तत्क्षणे तत्पुत्रो भार्या च शय्यामधिशयानावास्ताम्, तौ वीक्ष्य सक्रोधः खड्गमादाय हन्तुमुद्यतस्तस्मिन्क्षणे गृहीतं व्रतं सस्मार । पश्चाच्च सप्तांऽध्रि प्रतिगत्य यावत्पुरः सेधति, तावदेव प्रतिबुद्धस्तत्पुत्रो वक्तुमुपक्रान्तः—मातर्मातः ! कश्चिन्मां हन्तुमभ्येति । तन्निशम्य वंकचूलस्य मन्युः शशाम । पुनस्तदाऽचिन्तयत्—बत ! अहं स्वसूनुं सीमन्तिनीं च चेद्धन्यां तर्हि कियत्पापं पश्चात्तापश्च भवेत् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहो ! सुप्रभातमद्य मे, येन गृहीतो नियमः क्रोधं ननाश, वधोऽपि न संभावितः कस्यापि, तस्माद् भव्येनाऽपि कृतो नियमः कदाचिन्महत्फलं ददात्येव ॥ ९२ ॥ उक्तञ्च—

येन यश्चाऽपि हि स्तोकः, कालस्य नियमः कृतः । तस्याऽपि निष्फलो न स्या-त्सप्तपृष्ठकचौरवत् ॥ १ ॥

अथ षट्कायहिंसां हातुं न शक्यश्चेत्तथापि त्रसकायस्य तु वर्जनीयैव तत्र ९२-कथा—

भूपो वक्ति जनान्न यातिं पुरुषस्तं हन्मि योऽप्युत्सवे, षड् नेभ्यस्य गताः सुता हि पितरौ हन्त्याशु तान्नो तदा।
मुश्चाऽऽलाहि धनं तमाहतुरमूंस्त्वं नाथ! पश्चाऽधिकं, त्रिद्व्येकं हि सुतं विमुश्चति तया धर्मानुयोगे मुनिः?।९३॥

कश्चिद् भूपालः पौरजनान् सूचयति—अहमुत्सवं प्रक्रमामि, यो महे संमिलितो न भविष्यति तं दण्डयिष्ये । इत्याऽऽकर्ण्य सर्वे नागरा उत्सवं द्रष्टुमागताः, परं तेषु कस्यापि श्रेष्ठिनः षडपत्यानि नाऽऽययुः । तद्वृत्तं प्रणिधिभ्यो विदित्वा भूजानिस्तान् षट् स्वीयभृत्येभ्यः संनाह्य स्वालयमानाययत् । तेषां पितरावपि राज्ञः पुरोऽपक्रन्नामं नामं स्वसूनून् हातुं भृशं प्रार्थयामासतुः, परं क्षोणीपति-स्तद्वचनमेकमपि न स्वीचकार । पुत्राणां प्रतिफले द्रविणमप्यादातुं प्रीतो नाऽभवत् । निकामं परवन्तौ क्रिष्टौ पश्चाच्चित्रिद्व्येकादि-क्रमेणात्मजान् वर्जितुं भूमौ पातं पातं निवेदयामासतुः, किन्तु नृपचेतसि तद्वाक्यमास्पदं नो चकार । अन्ततो गत्वा विविधैरितो निर्घृणो नृपस्तेष्वेकमेव प्राणन्तमुत्ससर्ज । अस्मादेव जीवदयालवः सत्साधव उपदिशन्ति—षट्कायजीववधे भूयानधर्मोऽस्ति, अतः षट्काया रक्षणीयाः । यदि षट्कायजीवपालनं न संभाव्येत तथापि त्रसकायस्तु नूनं रक्षणीय एव ॥ ९३ ॥ उक्तञ्चापि—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संयतिः पितृतुल्योऽस्ति, षड् जीवाः पुत्रसन्निभाः । श्राद्धा नृपतयो ज्ञेयाः, कुटुम्बं चोत्सवाभिधम् ॥ १ ॥
घ्नन्ति षट्कायकाञ्जीवान्, श्रद्धावन्तः कुटुम्बिनः । षट् ते साधोः सदाऽच्छेद्या, रक्षैकं रक्ष भो ! घ्नतः ॥२॥

अथ शुभे सर्वे सहाया अशुभे न तु कश्चन तत्र ९३–कथा—

मुष्ट्याऽऽमन्त्रति भिक्षुमीड् यदि कणं नो लाति किं मानवं ?, तं मे देहि तदाह चेभ्यसचिवेशाग्रे गृहेशोदितम् ।
प्रोचुस्ते म्रियतां परान्हि कथितं व्याजेन नाशं गतो, दंडं तेऽस्ति तदाऽर्पिता स्वमहिला कार्यं न मेऽव्यक्तया ९४

कस्मिंश्चित्पुरे कस्याऽपि धनिकस्य गृहे कोऽपि भिक्षुको भिक्षितुमयासीत् । तेन धनिना तस्मै मुष्टिमितमन्नं दातुमारब्धं परं स नाऽगृह्णात् । ततः श्रेष्ठिनाऽभाणि–किं त्वं घातं कृत्वा जनान्नेतुमिच्छसि ? याचकोऽपि प्राह–यद्यहमाग्रहपरो भवेयं तर्हि जनानपि नयेयम्, इत्युक्त्वा श्रीमतो गृहद्वारदेशे सुप्तः । तदा श्रेष्ठी कोट्टपाल–प्रधान-व्यावहारिक–भूपप्रभृतीन् प्रत्यवक्–असौ याचको मम गृहिणीं याचतेऽदत्ते द्वारि प्राणानुत्स्रष्टुमुद्यतो भवति । ततस्तैरुक्तम्–म्रियते चेत्तर्हि म्रियेत, एवं सर्वेषामभिप्रायं विदित्वा गृहमायातः। पुनः सत्वरमेव प्रत्यागत्य सर्वेषां पुरो निवेदितं-स तु ममार । तन्निशम्य सर्वे वक्तुं लग्नाः–त्वं नरहत्याऽभियोगे गृहीतो भविष्यसि, यत्नेनाऽपि न मुच्यसे किल्बिषादस्मात् । इत्याऽऽकर्ण्य भीतः श्रेष्ठी निजप्रियां तस्मै दातुमुद्यतः किन्तु भिक्षुकः प्रत्यभाषत–नाऽर्थो ममाऽनया, इयन्तु मे भगिनीनिभा वर्तते । इत्थं पर्यालोचनेन सर्वेऽपि जनाः शुभे सहाया भवन्ति न त्वशुभे ॥ ९४ ॥ उक्तञ्च—

शुभे कार्ये हि सर्वस्य, सर्वे सन्ति सहायकाः । अशुभे न युतः कश्चिद्, धनदश्रेष्ठिनो यथा ॥ १ ॥

For Private and Personal Use Only

अथाऽसमये प्रष्टुरुत्तरदातुश्च यत्फलं जायते तत्र ९४–कथा–

–स्वर्गौरत्ति वनं तदा वनपतिः पुच्छं गृहीत्वा गतो–ऽन्येद्युःस स्वगृहे च प्रोचुरिह तं काऽत्त्याऽऽह भो मोदकान्
स्वर्यामो हि समं त्वया वरमतस्तत्पष्ठलग्ना ययु–स्तन्मानं किमु ? दर्शितं पथि करौ विस्तार्य सर्वेऽपतन् ९५

कस्मिंश्चित्क्षेत्रमध्ये स्वर्धेनुः प्रत्यहमेत्य चरति, परं क्षेत्रपतिस्तद्वृत्तं न विवेद, यत्कः पशुरत्राऽऽगत्य शस्यं खादति । एकदा शस्यपतिरधिक्षेत्रं छन्नं स्थितस्तत्काले स्वर्गवा समेत्य शस्यं चरितुं प्रक्रान्तम् । यदा शस्यं खादित्वा दिवं गन्तुं तत्पराऽभवत्तदा सोऽपि क्षेत्रेशस्तत्पुच्छं निगृह्य स्वर्गमारूढः । पुनरपररात्रे परावृत्याऽऽयान्त्या तया साकमेव स द्युमार्गादवततार, निकेतनमागतः स्वकुटुम्बैः पृष्टः सर्वं बभाण–अहमिन्द्रपुरीं गतस्तत्र मोदका भक्षितुं लभ्यन्ते, सुखेन चाऽवात्सम् । तन्निशम्य तद्बान्धवा अपि जगदुः- अस्मानपि तत्र नय, पश्चात्सर्वेऽपि कौटुम्बिकाः क्षेत्रे गत्वा निषेदुः । यदाऽऽगत्य गौश्चरति गन्तुं च प्रवृत्ता तदा सर्वे संभूय तेषु स्वर्गतेन प्रथमेन तत्पुच्छमवलम्बितम्, द्वितीयेन तस्य पुरुषस्य, तृतीयेन च द्वितीयस्यैवमेकैकस्य चरणाऽवलम्बिताः सर्वे दिवं प्रस्थितया धेन्वा सह गगनमध्ये गतास्तदा स्वर्गगतं प्रथमं द्वितीयोऽपृच्छत्–हे प्रियबन्धो ! कियत्परिमाणका मोदकास्त्वया भुक्ताः स्वर्गे । तस्मिन्नवसरे स प्रश्नोत्तरादित्सया त्वरितमेव करौ प्रसार्य मोदकप्रमाणं दर्शयितुं लग्नस्तदानीं मुक्ते पुच्छे सर्वेऽकस्माद् भुवि पतिताश्चूर्णितकायास्ते सर्वे सुखेन यमालयं जग्मुः । तस्मात्कालप्राप्तिमन्तरा पृच्छा न कार्या ॥ ९५ ॥ उक्तं हि—

वेलां विचार्य वक्तव्यः, सन्देहो न यथातथा । स्वर्धेनोरत्र दृष्टान्तः, पुच्छलग्नाः कृषीवलाः ॥ १ ॥
सर्वेऽपि लोभिनो यत्र, मन्दबुद्धिं गुरुं श्रिताः । तत्र तैर्नाऽऽनुगैर्भाव्यं, श्रुत्वैनां मौदिकां कथाम् ॥ २ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

### अथ बुद्धिमता भवभीरुणा नरेण वित्तगर्वो न कर्तव्यस्तत्र ९५-कथा—

कश्चित्प्राढ्यनरो दरिद्रपुरुषं हास्यं च मार्गेऽकरोत्, दत्त्वा तालपुटं निरीक्ष्य निकटे धीरस्तदा वक्ति तम् ।
किं रे ! द्रव्यमदं करोषि ? हि गुरोर्वाक्यं श्रुतं नो त्वया ?, पश्य त्वं जलयन्त्रके जलघटीं तद्वद्भवे स्याद्धनम्॥९६॥

कश्चिद्वित्ताढ्यः पुरुषः पथि प्रयान्तं कंचिन्निःस्वं जनं विलोक्य गर्वितस्तालिकां दत्त्वा जहास । तत्क्षणे कोऽपि प्राज्ञस्तन्निकटान्निर्गच्छन् धनगर्वितं तमुवाच—अरे ! त्वं मन्दः प्रतिभासि, अतो धनमदं करोषि । सुगुरोर्वचनान्यपि त्वया न श्रुतानि, सत्संगतिश्चाऽपि न कृतेति लक्ष्यते । अवहितः शृणु—घटीयन्त्रचालनेन यथा घटिका जलपूर्णा अपि च क्षणे रिक्ता भवन्ति, तद्वल्लक्ष्मीश्चंचला चपलेव यत्र तत्र क्षणं द्योतते क्षणान्तर एव निलीयते, तस्मान्नैषा विश्रंभयोग्या । तामाश्रित्य न परेषां परिहासमाचरेत् ९६

सूक्तं केनाऽपि—आपद्गतान् हससि किं द्रविणान्ध ! मूढ !, लक्ष्मीः स्थिरा न भवतीति किमत्र चित्रम् ? ।
किं तन्न पश्यसि ? घटीजलयन्त्रचक्रे, रिक्ता भरन्ति भरिताः पुनरेव रिक्ताः ॥ १ ॥

### अथ सर्वशास्त्रसारः परोपकारस्तत्र प्राज्ञपृथ्वीशयोः ९६-कथा—

भृत्वा कोऽपि कविस्तदा वृषशतेष्वीशांतिके पंचसु, संप्राप्तो यदि पृच्छतीति किमिदं तं प्राह सत्पुस्तकम् ।
श्रोतव्यं भवता क्षमो न सकलं श्रोतुं हयारोहणं, कृत्वा यामि नृपं हि वृत्तशकले यत्कोटिशास्त्रैर्मतम्॥ ९७

एकदा कश्चित्कविः पञ्चशतेषु बलीवर्देषु पुस्तकानि धृत्वा कस्यापि नृपस्यान्तिकं ययौ । तदानीं भूपालोऽश्वंतमारुह्य बहिर्गन्तु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुद्यत आसीत् । अथ पंडितः शुभाशिषं दत्त्वा तस्थौ, उर्वीशस्तमपृच्छत्-भोः ! पञ्चशतेषूक्षसु किमारोहितमस्ति ? प्राज्ञेनोक्तम्-देव ! एषु पुस्तकानि विद्यन्ते, तानि भवन्तं श्रावयितुमुपागतोऽस्मि, सावधानेन निशम्यताम् । भूपेनोक्तम्-सांप्रतं महतः शास्त्रौघाना-कर्णयितुं मे शक्तिश्चाऽवसरोऽपि नाऽस्ति । बुधः प्राह-यदि निखिलान्निगमान्न शृणोषि, तर्हि तुरीयांशमेव श्रुत्वाऽऽत्मानं पुनीहि । विहारकौतुकी क्षोणीपतिः पुनरप्यूचिवान्-अधुनाऽहं बहिर्गच्छामि, तस्मात्ते यद्वक्तव्यं तदेतावत्यामेव वेलायां श्रावय । ततः कोविदोऽवदत्-पञ्चशतवृषस्थितपुस्तकेषु यः परमार्थस्तं पद्यपदयुग्मेनाऽभिव्यनज्मि, दत्ताऽवधानः समाकर्णय—

**श्लोकार्द्धेन प्रवक्ष्यामि, यदुक्तं ग्रन्थकोटिभिः । परोपकारः पुण्याय, पापाय परपीडनम् ॥ १ ॥**

अर्थात्परोपकारः पुण्यम्, परार्त्तिः पापमिति कोटिग्रन्थपरमार्थः । इति कोविदभाषितं निशम्य प्रीतो भूजानिस्तस्मै लक्षमेकं तुष्टिदानं दत्त्वा विससर्ज । तस्माद् भो भव्याः ! सर्वशास्त्रसारे परोपकारे जागरूकतया स्थेयमिति सत्यसिद्धान्तं जानीत ॥ ९७ ॥

**अथ सामायिके समभावः स्थापनीयस्तत्र ९७-कथा—**

**युद्धं पाण्डुसुतैर्विधाय दमदन्तः सार्द्धमत्र व्रतं, तस्थौ तद्विपिने समीक्ष्य मुनिपं तत्राऽऽगताः पाण्डवाः ।**
**पश्चात्कौरवकास्तमश्मनिकरैर्हत्वा गतास्तद्वपु,-स्तद्भावः सदृशोऽभवत्तदुपरीत्येवन्तु सामायिके ॥ ९८ ॥**

एकदा पाण्डोः पञ्चपुत्राणां दमदन्तेन सह युद्धमभवत् । पाण्डवास्तत्र पराजयं प्राप्य कान्दिशीका बभूवुः । अथ दमदन्तभूपतिर्वैराग्येण दीक्षां ललौ । एकदा दमदन्तो मुनिः पाण्डुराजस्य नगरोपवनमेत्य कायोत्सर्गे स्थितोऽभूत्, अत्राऽन्तरे तत्रोपवने पाण्डवाः ॥ ४२ ॥

For Private and Personal Use Only

क्रीडितुमागतास्तत्र मुनिं तथा वीक्ष्योपलक्ष्य च तद्गुणवर्णनं कर्तुं लग्नाः । पश्चात् शतभ्रातरः कौरवास्तत्राऽऽगतास्तं मुनिं वीक्ष्य क्रोधकम्पितकायाः सर्वे तं पाषाणशकलैस्ताडितवन्तः । तदाऽऽघातपीडितस्याऽपि मुनेस्तयोः पाण्डवकौरवयोरुपरि समभाव एवाऽतिष्ठत् । एष दृष्टान्तः सामायिकसमये शत्रुमित्रादिसर्वभूतेषु साम्यमेवोपदिशति ॥ ९८ ॥ तथा चोक्तम्—

भक्तेषु पांडुपुत्रेषु, धार्तराष्ट्रेषु हन्तृषु । समो भावोऽभवद्यस्य, स राजर्षिरुदाहृतः ॥ १ ॥

अथ विद्याध्ययनोपरि ९८-कथा—

स्नानार्थं जलमाहरन्निजसुतं दृष्ट्वाऽवदत्तं प्रसू-र्मूढस्त्वं कथमाह शास्त्रसकलं ज्ञात्वाऽऽगतः सा पुनः ।
नाऽधीतं यदि दृष्टिवादमखिलं श्रुत्वा क्व? तत्तोशलेः, गत्वा पाठय तं मुनिं मम समो भूत्वाऽभवज्ज्ञो वरः ॥९९॥

कश्चिद् ब्राह्मणो ज्योतिषादिचतुर्दशविद्याः समधीत्य गृहमागतः, स चैकदा स्नानार्थं स्वां दुहितरं जलमयाचत । तदा सा कलशमेकमापूर्य समानयत्, तदवलोक्य सोऽवदत्—मम स्नानं नैवं भविष्यति, किन्तु घटं भृत्वा २ मम मस्तके जलं प्रक्षिप । ततस्तन्मात्रा भणितम्—त्वं मूर्ख एव दरीदृश्यसे, भणितः परं गुणितो नाऽसि । ततो रुष्टेन पुत्रेण गदितम्—अहं सर्वाणि शास्त्राणि सम्यगधीत्य व्यवहृत्य विचार्य प्रवचनीकृत्य चाऽऽगतोऽस्मि, पुनः कथंकारमहं मूढः? तदा जनन्याऽभिहितम्—त्वया यावद् दृष्टिवादो नाऽधीतस्तावत्त्वदधीतमप्यनधीततुल्यमेव । पश्चात्स व्यचिन्तयत्—अमुं ग्रन्थं कोऽध्यापयिष्यति ? माता पुत्रस्य हार्दमभिप्रायं विज्ञाय सस्नेहमुवाच—पुत्रक ! तोशलेराचार्यस्य सविधं त्वमुपेहि, स एव त्वां पाठयिष्यति । तत आचार्यमुपेत्य कृताञ्जलिः स प्रोवाच—भगवन् ! मां

दृष्टिवादं पाठय। ततो गुरुणा व्याहृतम्—त्वं मादृशो भवेस्तदा त्वां पाठयेयम् । तदा स साधुसदृशो भूत्वा पठित्वा च बुधोऽजनि। पश्चात्तत्प्रभावादसारं संसारं ज्ञात्वा पारभविकं च कल्याणमीप्सुर्जैनधर्मे दीक्षितोऽभवत्तेनाखिलं समीहितं सम्पन्नश्च तस्य ॥९९॥

उक्तश्च—किं ताए पढियाए, पयकोडीए परालभूयाए । जं इत्तियं न नायं, परस्स पीडा न कायव्वा ॥ १ ॥

अथ सर्वदानेष्वभयदानं प्रवरं तत्र कस्याऽपि राज्ञश्चतसृणां महिषीणां ९९—कथा—-

स्त्रीणामिष्टवरः कदा नृपतिना तुष्टेन दत्तश्च तं, प्रोचुस्ता हि वरं हरं न जहि भो ? ज्येष्ठैकघस्त्रोऽर्पितः ।
तस्य स्वो मह्निमा तया कृत इतो द्वाभ्यां च तद्वत्ततः, स त्रातोऽन्तिमया तदा कलिरभूत्स्तेनेन ता वारिताः ॥१००॥

जातु कश्चिद्राजा चतसृषु स्वराज्ञीषु तुतोष, वरं च वृणीध्वमिति ताः प्रत्यवोचत् । तदा भूपभार्या बभाषिरे—सत्यवसरे प्रार्थयिष्यामः । अथैकस्यां रात्रौ कश्चिच्चौरः कृतपरस्वापहारो राजशासनेन सौनिकैः शूलाऽऽगारे नीतस्तं निभाल्य तासु चतसृषु राजयोषित्सु तिस्रो महिष्यः पूर्वदत्तवरेण चौरस्यैकैकं दिवसं जीवनमयाचन्त, राजा च वव्रे । ततस्तास्तिस्रोऽपि क्रमेण पानाशनशयनासनवसनभूषणादिभिर्निकामं तं सुखयामासुः । परं निधनभयेन वराकः शर्मलेशमपि न विदाश्चकार । तुरीया नृपप्रिया तस्य यावदायुषं जीवनं ववार, राजापि तथाऽनुमेने । ततो द्वितीयदिने चतस्रोऽपि राजभार्या विकत्थनपरा मया बहूपकृतमित्थं तारस्वरेण मिथो विवदन्ते स्म । एवं परस्परमीर्ष्यां कुर्वत्यस्ता उपराजमगुः । क्षितिपतिरपि तन्निर्णयार्थं तस्करं पप्रच्छ—भो मोषक ? आसु कतमा तवाऽभिमता गरीयसी हितैषिणीति वद ? स्तेनः प्राह—राजन् ! सर्वासामपि देवीनां मयि हतभाग्ये महानुपकारो वरीवर्ति, परं तत्राऽपि

महत्तरोपकारस्तस्यास्तुर्याया विद्यते या मम जीवनलतां स्नेहरसेनाऽभिषिच्यैधयामास । तस्मात्सर्वेषु विश्राणनेष्वभयमेवाऽनुत्तमं दानमस्ति ॥ १०० ॥ कथितमपि—

मृतेर्भीतिस्तु न ज्ञातः, सुजग्धमहिमा मया । कदन्नं भक्षितं चाद्या–ऽभयाद्के ? चामृताधिकम् ॥ १ ॥

अथ सहसा किंचिदपि न कर्तव्यं तत्र नृपचकोरयोः १००–कथा—

तस्थौ हस्तचकोरभृच्च तृषितो वृक्षाश्रयेऽहेर्मुखा–त्तत्रोर्ध्वादपतद्गरं नृपतिना नीरेच्छयाऽऽत्तं करे ।
तद्दूरीकृतमभ्रगेण स परं क्रोधेन वै मारितो, भूपस्तत्तदनूरगश्च पतितः खेदन्तु दृष्ट्वाऽकरोत् ॥ १०१ ॥

एकदा कश्चिन्नृपश्चकोरकं करे कृत्वा कस्मिंश्चित्कानने तरोरधस्तस्थौ, तत्कालं राजा पिपासापीडितोऽभवत् । अथ द्रुमोपरिष्टात् कस्याऽपि महाकायस्याऽजगरभुजंगस्याऽऽस्याद्गरलं च्योतति स्म, भूपश्च भ्रान्त्या तदच्छं पयो विदित्वा पाणिसंपुटे न्यस्य तृषितः पातुं प्रवर्तते स्म । ततश्चकोरोऽपि यद्यसावेतन्नीरमपास्यत्तदा गतासुरभविष्यदिति विचार्य पक्षाभ्यामम्भश्चिक्षेप । भूयोऽपि भूपः पत्रपुटं वारिणा बभार, परं तदपि न्यपातयदिति कुपितो नृपोऽविचार्यैव विहगं जघान । ततोऽचिरकाल एव शयुरुपरिष्टादधोऽपतत् । तं पतितं विलोक्य भूजानिर्भृशं तप्यते स्म-हन्त ! निरपराधोऽयं वराको विहगो मया हतः । बत ! अहन्तु तेन रक्षितोऽन्यथा शयुमुखनिःसृतविषपानान्नूनं प्राणान् जह्याम् । धिङ् मां यदुपकारिणं प्रति मयैषोऽनुचितव्यवहारोविहितः, प्रतिफले च वराकस्य प्राणाऽपहारः कृतः । केनोपायेनाऽऽस्याऽनृण्यं समुपेयाम् ? मयाऽविचारितमेव विहितम्, किमु कुर्याम् ? क्व गच्छानि ? कमालपानि ? कमाश्रयाणि ? निस्त्रपोऽस्मि, यदुपकारिणमपकृत्याऽपि धारयामि प्राणान्, देवि वसुन्धरे ! देहि मे प्रवेशार्थं विवरम् । एवं करुणापश्चात्ताप-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूर्णतरैर्वचनैरात्मानं निन्दन् खादन्पिबन् श्वसन् प्रतिवृत्तं प्रलपन् गच्छन् स्वपन्नुन्मिषन्नपि स्वात्मन्येवं स्मृत्वा २ खिद्यते स्म, क्वापि शान्तिं नेयाय । अतो मतिमद्भिर्निखिलमामुष्मिकं पारत्रिकञ्च कार्यं सुविचार्यैव करणीयम् ॥ १०० ॥ कथितञ्च—

क्रोधप्राप्तौ निकृष्टं हि, फलं प्राप्नोति मूढधीः । शोचत्यन्तेऽविवेकी स, चकोरघ्नो नरेशवत् ॥ १ ॥

तस्माद् व्यग्रेण सता मानवेन किमपि कार्यं न विधातव्यमन्यथा पक्षिघातकभूपवत्पश्चात्तापपरीतः स्यादिति । उक्तमपि—

सहसा विदधीत न क्रिया-मविवेकः परमाऽऽपदां पदम् । वृणते हि विमृश्यकारिणं, गुणलुब्धाः स्वयमेव सम्पदः २

अथ मूलटीकाग्रन्थकर्तृ-प्रशस्तिः—

श्रीलुंकाख्यगणे गणीश्वरगुरुः श्रीकेशवाख्यः सुतः, शिष्येणाऽऽशु कृतं वरं निजधिया दृष्टान्तकानां शतम्
छन्दोऽलंकृतिशब्दशास्त्ररहितं काव्यं तदा निर्मितं, तत्सर्वं मुनितेजसिंहऋषिणा धीरैर्विशोध्यं वरैः ॥ १ ॥

श्रीसौधर्मबृहत्तपोगणवरे ज्ञानक्रियोद्धारको, विख्यातोऽजनि भूतलेऽत्र नितरां राजेन्द्रसूरीश्वरः ।
तत्पट्टं समलंचकार धनचंद्राख्यश्च सूरीश्वरो, भूपेन्द्राभिधसूरिणातिशुशुभे पट्टे तदीये ततः ॥ २ ॥
शोचिष्केशसुकुञ्जराङ्कहिमगौ वर्षे सुवर्षर्तुके, भाषायां रचिताभितान्तसरलं तेनातिरम्यं कृतम् ।
दृष्टान्ताच्छतकात्सुसंस्कृतमिदं ग्रामे थरादे शुभे, व्याख्याने पठतां सतां मुदमिदं देयाच्च संशृण्वताम् ॥ ३ ॥
गच्छतः स्खलनं क्वापि, भवत्येव प्रमादतः । हसन्ति दुर्जनास्तत्र, समादधति सज्जनाः ॥ ४ ॥ अपि च-
गुणदोषौ बुधो गृह्णन्-न्निन्दुक्ष्वेडाविवेश्वरः । प्रथमं शिरसा धत्ते, परं कण्ठे नियच्छति ॥ ५ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति श्रीसौधर्मबृहत्तपोगच्छीय-सुविहितसूरिशक्रचक्रपुरन्दरसकलजैनागमपारदृश्व-परम-
योगिराज-जैनाचार्यभट्टारक-श्रीमद्विजयराजेन्द्रसूरीश्वरान्तेवासि-सिद्धान्तमहोदधि-
न्यायचक्रवर्त्ति-परम्परानुग-श्रीमद्विजयधनचन्द्रसूरीश-पट्टप्रभावक-साहित्य-
विशारद—विद्याभूषण—श्रीमद्विजयभूपेन्द्रसूरीश्वरेण संवत् १९८३
चातुर्मास्ये श्रीथिरपुरे (थरादनगरे) साध्वादीनां सुव्याख्या-
नदानाय सरलसरससंस्कृते विरचितमिदं सटीकं
दृष्टान्तशतकं समाप्तिमगमत् ॥

मुद्रक शेठ देवचंद दामजी, आनंद प्रेस-भावनगर.

For Private and Personal Use Only